णप्रतिष्ठा ततः ओं ग्रां ह्रूं फट् स्वाहा इत्यनेन कायवाक्चित्तशो
धनं कृत्वा ओं रां ह्रूं फट् स्वाहा इत्यात्मरक्षां कृत्वा ओं ग्रां ह्रूं फट् स्वा
हा इति हृदि दृढं दत्वा आत्मरक्षां विधाय स्वकामे यथोचितां द
तीं संस्थाप्य ततः प्राणायाममष्टावादिकारयित्वा कृतांज

प॰
४८

तिः ऋष्यादिन्यासंकुर्यात् अस्यश्रीदक्षिणाकालिकामंत्रस्य
भैरवऋषिः उष्णिक्छंदः श्रीदक्षिणाकालिकादेवता ह्रींबी
जंहूंशक्तिः क्रींकीलकं ममश्रीधर्मार्थकाममोक्षार्थेजपेवि
नियोगः इतिकृतांजलिः स्मृत्वायथाविधिन्यसेत् शिरसि
भैरवऋषयेनमः मुखेउष्णिक्छंदसेनमः हृदिश्रीदक्षिणा
कालिकादेवतायैनमः गुह्येह्रींबीजायनमः पादयोः हूंशक्त

48

येनमः नाभौक्लींकीलकायनमः ममश्रीधर्मार्थकाममोक्षा
र्थेजपेविनियोगः इतिसर्वांगेव्यापकंकुर्यात् इतिका
येनमनसावाचाशुष्यकंठकेनवाविस्मयकरांगन्यासौकुर्या
त् ॐक्रांअंगुष्ठाभ्यांनमः ॐक्रींतर्जनीभ्यांस्वाहा ॐक्रूंमध्य
माभ्यांवषट् ॐक्रैंअनामिकाभ्यांहुं ॐक्रौंकनिष्ठिकाभ्यांवौ
षट् ॐक्रः करतलकरपृष्ठाभ्यांफट् इतिकरन्यासः ततः

प० ४९

49

ॐ क्रां हृदयाय नमः ॐ क्रीं शिरसे स्वाहा ॐ क्रूं शिखायै वषट्
ॐ क्रैं कवचाय हुं ॐ क्रौं नेत्रत्रयाय वौषट् ॐ क्रः अस्त्राय फट्
इति षडंगन्यासः मूलवर्णत्रयेण द्विरावृत्त्यांगन्यासमेवाकुर्यात्
हृदि अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं नमः दक्षभुजे एं ऐं ओं औं अं अः कं
खं गं घं नमः वामभुजे ङं नमः चं छं जं झं ञं टं ठं डं ढं नमः दक्षि
णजंघायां णं तं थं दं धं नं पं फं बं भं नमः वामजंघायां मं यं रं लं

वंशंषंसंहंलंक्षंः नमः ततोमातृकान्यासः तत्रादौस्वरैः
पूरकः कादिमांतैः कुंभकः यादिभीरेचकः इतिमातृ
काप्राणायामंकृत्वा ॐअस्यश्रीछुद्धांतमातृकान्यासस्य
ब्रह्माऋषिः गायत्रीछंदः श्रीमातृकासरस्वतीदेवता
हलोबीजानिस्वराःशक्तयः अव्यक्तंकीलकं ममश्री
दक्षिणाकालिकांगत्वेनन्यासेविनियोगः इतिकृतां

प॰
५॰
80

जलिः स्मृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्री छंदसे
नमः हृदि मातृका सरस्वती देवतायै नमः गुह्ये हलो बी
जेभ्यो नमः पादयोः स्वरशक्तिभ्यो नमः नाभौ अव्यक्त की-
लकाय नमः मम श्रीदक्षिणकालिकांगत्वेन न्यासे विनियो
गः इति सर्वांगे व्यापयेत् दक्षकरतले अं नमः वामे आं नमः
दक्षकरपृष्ठे इं नमः वामे ईं नमः दक्षकरतले उं नमः वामे ऊं

नमः दक्षांगुष्ठमारभ्य वामांगुष्ठावधि दशस्वंगुलीषु अका
रादिविसर्गान्तान्विन्यस्य पुनर्वामांगुष्ठादि दक्षांगुष्ठावधि
दशस्वंगुलीषु अकारादिविसर्गान्तान्दशस्वरान्संहारनीत्या
मबिंदून्विन्यस्य पुनर्दक्षांगुष्ठादि वामांगुष्ठपर्यंतेषु दशस्वंगु
लीषु अकारादिविसर्गान्तान् सविसर्गान्विन्यस्य पुनर्दक्षांगु
ष्ठादितर्कनिष्ठांतेषु पंचांगुलीषु अकाराद्येकारांतान्पंचस्व

प
५।(

रान्विंदुविसर्गीयुतान्विम्बस्य पुनर्वामांगुष्ठादितर्जनिष्ठांते षुपं
चांगुलिषुपेकारादिविसर्गीतान्यंचस्वरान्विंदुविसर्गयुतान्विम्ब
स्य पुनर्दक्षांगुष्ठस्य मूलपर्वारभ्य वामांगुष्ठस्याग्रपर्वपर्यंते
षुविंशत्स्थानेषु ककारादिशकारांतान्विंशद्वर्णान्न्यसेत्पर्वैकै
कशो विम्बस्यावशिष्टषकारादिक्षकारांतान्यंचवर्णान्करद्वय
स्यांगुष्ठादिकनिष्ठांतेषु पंचांगुलिद्वयेषु युगपदेकैकम

त्वरं सबिंदुविसर्गं युतान्विन्यसेदिति मातृकाद्यैः करशुद्धिवि
धाय ॐ ऐं ह्रीं श्रीं अं कं अां हृदयाय नमः इं चं ध ईं शिरसे स्वा
हा उं टं ऊं शिखायै वषट् एं तं ऐं कवचाय हुं ओं पं औं नेत्र
त्रयाय वौषट् अं यं ९ अः अस्त्राय फट् इति मातृकाषडंगं अंगु
ष्ठादितलांतं करयोर्विन्यस्य हृदादिषडंगेष्वपि न्यसेत् ततः व्यो
मेंदोरसनाणांककाणिकमचांद्वंद्वैः स्फुरत्केसरं पद्मांतर्गतपं

प॰ ५२

52

चवर्गयशानार्णादित्रिवर्गक्रमात् श्रीशास्त्वाश्रिपुलांतलांग
लिपुतान्तोर्णीपुरेणाहृतेवर्णाज्ञंशिरसिस्थितेविप्रगट्यधं
सिमसंजयं मूलाधारधनिक्रम्यापवृह्यशाखीकुंडली ज्वल
न्पावकसंकाशां सूक्ष्मतेजस्वरूपिणीं मूलाधाराच्छिरःपद्म
स्पर्शनीं विद्युदाकृतिं तयास्पृष्टशिरःपद्मादमृतौघस्वरूपि
णः निर्गतान्मातृकावर्णान्स्रवमाणान्वर्न्मनान्ते व्यापये।

त्वास्थितान्सर्वानेवं ध्यात्वा प्रविन्यसेत् इति सत्त्वरूपं ध्यात्वा
न्यसेत् विशुद्धौ षोडशदलकमलमूर्धगुरुं ध्यात्वा तद्दलेषु प्रा
गादिप्रादक्षिण्ये ॐ पं ह्रीं श्रीं ग्रं नमः श्रीं नमः एवं षोडशस्वरान्न्य
सेत् ततोऽनाहते द्वादशदले ककारादिठकारान्तान्द्वादशवर्णान्
एवं मणिपूरके दशदलकमले डकारादिफकारान्तान्दशवर्णा
न् स्वाधिष्ठाने षड्दले बकारादिलकारान्तान्षड्वर्णान् मूलाधा

प०
५३

53

ंचक्रंदलकमलेवकाराद्दिसकारांतांस्थितरोवर्णान् अमध्येहि
दलेहक्षौसकान्स्त्रणवविनाद्दिनमोनानान्विन्यसेत्तरति श्रेनमा
त्रकामासंकृत्वावद्दिमातृकांन्यसेत् अथध्यानदयस्वंतमातृका
वदेव ध्यानेन पंचाशद्वर्णभेदैर्विहितवदनदोःपादहृत्कुक्षिव
क्षोदेशांभास्वत्कपर्दाकलितशशिकलामिंदुकुंदावदातां अक्ष
स्रक्कुंभचिंतालिखितवरकरांत्रीक्षणांपद्मसंस्थामच्छाकल्पा

मतच्छस्तनजघनभरांभारतींतांनमामि दक्षोर्ध्वकरमारभ्य
दक्षाधःकरपर्यंतमाग्रुपध्यानेविनालिखितंपुस्तकमिति
वर्णैरविंद्ध्यात्वा हस्रौंः श्रं ५. स्रौंनमःइति मूर्धादिपादां
तेव्यापकंविन्यस्य शिरसि गेंपेंक्लींश्रीं श्रंनमः मुखे श्रां
नमः दक्षनेत्रे ५ इं २ वामे ऐंनमःदक्षकर्णे ५ उंनमः
वामे ५ ऊं २ दक्षनासि ५ ऋंनमःवामायां ५ ॠंनमः

प्र·
५४

54

दक्षगंडे ४ ऌंनमः वामे ४ ॡंनमः उत्तरोष्ठे एंनमः अधरो
ष्ठे ४ ऐंनमः ऊर्ध्वदंतेषु ४ ओंनमः अधोदंतेषु औंनमः शिर
सि ४ अंनमः जिह्वाग्रे ४ अःनमः दक्षबाहुमूलकूर्परमणि
बंधांगुलिमूलाग्रेषु ४ कं २ खंनमः ४ गंनमः ४ घंनमः ४
ङंनमः वामेषु चंनमः ४ छंनमः ४ जंनमः झंनमः ४ ञं
२ दक्षोरुमूलजानुगुल्फांगुलिमूलाग्रेषु ४ टं २ ४ ठंनमः

ॐ ङं नमः ~~वामेषु चं नमः~~ ॐ छं नमः ॐ जं नमः ञं वामेषु ॐ
तं नमः ॐ थं नमः ॐ दं नमः ॐ धं नमः ॐ नं नमः दक्षपार्श्वे
ॐ पं नमः ॐ फं नमः पृष्ठे ॐ बं नमः नाभौ ॐ भं नमः जठरे
ॐ मं नमः हृदि ॐ यं त्वगात्मने नमः दक्षांसे ॐ रं असृगात्मने
नमः ककुदि ॐ लं मांसात्मने नमः वामांसे ॐ वं मेदसात्म
नेनमः हृदादिदक्षपाण्यन्तं ॐ शं अस्थ्यात्मने नमः हृदा।

प.
५५

55

दिवामपाण्यंतं षं मज्ञात्मनेनमः हृदादिदक्षपादांतं भं संज्ञ
ज्ञात्मनेनमः हृदादिवामपादांतं मं हंप्राणात्मनेनमः पाद
दिनाभ्यंतं सं जीवात्मनेनमः नाभ्यादिमूर्धांतं क्षंः परमात्मने
नमः इतिशुद्धमातृकान्यासः अत्रशुद्धत्वेपिविंदुयुतेवीर्यसं
योजनार्थमिति संप्रदायः अथविंदुयुतमातृकान्यासः तत्र
ऋष्यादिपूर्ववन्मातृकावदेव ध्यानं तु अक्षस्रजं हरिणपोतमु

दशरं कं विषां कैरविरतं दधतीं त्रिनेत्रां श्वेपेंदुमौलिमरुणा
मरविंदकांतां वर्णेश्वरीं प्रणमत स्तनभारनम्रां इत्याधःक
रमारभ्य वामाधःकरपर्यंतमायुधध्याने तत्र हृदयादिब्र
ह्मरंध्रांते ह्रां नमः इत्यादिशिरसि श्रं नमः इत्यंते संहारक्र
मेणाननतन्न्यासेन पुन्न्यसेत् इति त्रिविधपुनमातृकान्यासः श्र
थ विसर्गमातृकान्यासः तत्र ऋष्यादिकं ध्यानं च पञ्चमा

रकावेव वर्णेषुविसर्गान्वितत्वविशेषः ततोबिंदुविसर्गी
मातृकान्यासः तत्रऋष्यादिकंपूर्ववत्ध्यानेन सिंदूरकां
तममिताभरणांत्रिनेत्रांविद्याक्षसूत्रमृगपोतवरान्दधानां पा
र्श्वस्थितांभगवतीमपिकांचनाभांध्यायेत्कराब्जधृतपुस्तक
वर्णमालां वामाधःकरमारभ्यवामोर्ध्वकरपर्यंतमायुधध्या
नं शिवशक्त्योरुत्तवामादि इतिध्यात्वान्यसेत् इतिगणपत्के

धं डंः नमः धं ढंः नमः इत्यादि प्रणवविनाशरहितं नमो
न्यंतं मूर्द्धादिदक्षिणजान्वंतं शुद्धमातृकान्यासेनैव विन्यसे
दिति स्थितिरूपो विंदुविसर्गमातृकान्यासः [illegible] वी
जादिमातृकान्यासः तत्रशक्तिऋषिः गायत्रीछंदः हृल्ले
खारूपिणी सरस्वती देवता इति ऋष्यादिकं स्मृत्वा विन्यस्य
ॐ ऐं ह्रीं श्रीं ग्रं कं धं ग्रां ह्रां हृद· धं ईं चें धं ईं ह्रीं शिर· धं उं टं धं

पा॰ ५७

S7

ॐ ह्रूं शिखा॰ थं पैनं थं पैं ह्रैं कवचा॰ थं ओं पं थं ओं ह्रौं नेत्र॰ थं श्रं पं थं श्रः ह्रः अस्त्राय फट् इति करषडंगन्यासः ततो ध्यानं उद्यत्कोटिदिवाकरप्रतिभटां ... पीनस्तनी वक्षोजैः ... किरीटहाररशनामंजीरसंशोभिता विभ्राणा कु... पंकजे ... पाशांकुशौ ... त्रिनयना ... दत्वा अधः करमारभ्य ... वामाधः कर

पर्यंतमातृपध्याने इतिवर्णारविंदेध्यात्वा ऐं ह्रीं श्रंनमः
ऐं ह्रीं श्रांनमः ऐं ह्रीं इंनमइतित्वकारांतान्वर्णान्नृष्ठद·
मातृकाध्यानेषुन्यसेदितिहृल्लेखामातृकान्यासः अथ।
श्रीबीजादिमातृकान्यासः भृगुऋषिः गायत्रीछंदः मार
कामयीलक्ष्मीदेवतान्यासेविनियोगः इतिस्मृत्वाविन्यस्य
ऐं श्रंकं ऐं श्रांख्रांहृदः ऐं इंचं ऐं ईंश्रींशिरसे· ऐं उंटं ऐं ऊं

प॰
५८
58

ह्रूं शिखा॰ यैं यंनं यैं यैंह्रैं कवचा॰ यैं ॐयं यैं ॐह्रौं नेत्र॰ यैं
ॐयं यैं ॐ॰ ह्रः अस्त्राय फट् इति करषडंगन्यासः ततो ध्याने
ह्रूं शिखा यैं यंनं यैं यैंह्रैं कव॰ ॐयं यैं ॐह्रौं नेत्र॰ यैं ॐयं यैं
ॐ॰ ह्रः अस्त्राय॰ इति षडंगविधाय विद्युद्दामसमप्रभां हिम
गिरिप्रस्थेस्थितांसिंहगेः शुभ्रांदंष्ट्रसमुद्भूतामृतवत्सैरागसिंच्यमा
नामिमां विद्यामंकरपंकजेजंपवदीपचद्वयंपल्लकंभास्व

इत्वसमुज्वलां ऊचननां ध्यायेज्जगन्मोहिनीं इत्वाधः कर
माभ्यकामाधः करपर्यंतमाभुपध्याने ततः थे श्रीं थ्रं २
थे श्रीं श्रीं २ थे श्रीं उंनमः २न्याहिन्यसेत् अथ कामबीजा
दिमातृकान्यासः तत्र संमोहनऋषिः गायत्री छंदः मातृ
कामयी संमोहनी देवता हृतिणाकालिकांगत्वेन्यासेन
विनियोगः इतिविन्यस्य थे श्रींकं थे श्रीं क्रां हृद थे

प
५९

59

रें वं धें रें क्लीं शिरसे धें ॐ ह्रें धें ऊं शि॰ धें पं नं धें पैं ह्रैं कव धें ॐ
पं धं ॐ ह्रैं क्लौं नेत्र धें श्रं यं धें श्रः क्रः अस्त्राय॰ इति षडंगं कृत्वा
ध्यायेत् ॐ बालार्ककोटिरुचिरां स्फटिकाक्षमालां कोदण्ड
मिक्षुजनितं स्मरपंचबाणान् विद्यां च हस्तकमलैर्दधतीं
त्रिनेत्रां ध्यायेत्समस्तजननीं नवचंद्रचूडां वामाधः करमा
रभ्य दक्षोर्ध्वकरपर्यंतमायुधध्यानं चकारादक्षमालापुस्तक

योऽङ्गमन्त्रो बीजरूपमिति ध्यात्वा ॥ ह्लीं अं नमः ॥ ह्लीं आं न
मः इत्यादि न्यसेत् अथ त्रिबीजादिमातृकान्यासः तत्र
महासंमोहन ऋषिः गायत्री छन्दः मातृकामयी महासं
मोहनी देवता इति ग्गाकालिकांगत्वेन न्यासे विनियोग
इति विन्यस्य ॥ अं कं ॥ आं ह्रीं खं ईवं ॥ इं ग्रीं शिरः ॥ उं रं
॥ ऊं क्लीं शि ॥ एं नं ॥ ऐं ह्रीं कव ॥ ओं पं ॥ औं ग्रीं नेत्र

प॰ ८॰

६०

धं ग्रं यं ९ ग्रंः क्लीं अस्त्रा इति षडंगं विधाय ॐ ध्यायेद्धेम
त्नवलयेत्नशरासपाशपद्महणांकुशशरान्नवपल्लवकेच
आबिभ्रतीं निजकरैररुणांकुचानांसेमोहिनीं त्रिनयनां नव
चेंदुचूडां वामाधःकरमारभ्य दक्षाधःकरपर्यंतमायुधध्यानं
इति ध्यात्वा ऐं ह्रीं श्रीं क्लीं ग्रं नमः ऐं ह्रीं श्रीं क्लीं ग्रां नमः इत्या
दिन्यसेत् अथ यथपरांसेधरितमातृकान्यासः ब्रह्मा ऋषिः

गायत्रीछंदः परारूपिणीमातृकासरस्वतीदेवता न्यासे
विनियोगः अंकं ध अंसांद्र ध इंचं ध ईंसींशिर ध उंटं
ध ऊंस्तूंशि ध ऋंनं ध ऐंसैंक ध ओंपं ध औंसौंनेत्र ध अं
ये ९ अः सः अस्त्रा इति षडंगं ध्यानेन ओं सकलेकश
शंकाभां अत्रां चेदकलावतीं शुभ्रापुस्तकमक्षान्देशणमा
मिपरांकलां ध सौः अंसौः नमः ध सौः ओंसौः नमस्त्या

प
८१
61

रिमसेत्व अथर्व समात्तकां ब्रह्माऋषिः गायत्रीछंदः हरगौ
रीस्वरूपिणीमात्तकादेवतान्यासेविनियोगः थं अं कं थं आं
हां सां थं इं चं थं ईं ह्रीं सीं शिर थं उं टं थं ऊं ह्रूं सूं शिखा थं पं तं थं पंं हंं मंं
कं थं ओं पं थं औं ह्रौं सौं नेत्र थं अं यं रं अंः हंः संः अस्त्रा इति षडंगं
ध्यानेत्व ओं उद्यद्भानुस्फुरिततडिदाकारमर्धाम्बिकेशं पाशाभीती
वरदपरशुं संदधानं कराब्जैः दिव्याकल्पैर्नवमणिमयैः शोभि

तेविश्वमूलंसौम्याग्नेयंवपुरवनत्रयंरंद्रूं ॐत्रिनेत्रं वामोर्ध्व
करादिदत्तोर्ध्वकरपर्यंतमामुपध्याने ध हंसः श्रोंनमः ध हंसः
श्रोंनमः न्यासादिन्यसेत् अस्यपरमहंसमातृका मंत्रपरमहंसऋ
षिः गायत्रीछंदः परमात्मस्वरूपिणीमातृकासरस्वतीदेवता
इतिविन्यस्य ध ॐ अंकं ध आं ॐ हृ ध ॐ रं चं ध ई ॐ शिरसि ध
ॐ उं टं ध ऊं ॐ शिखा ध ॐ पं नं ध ऐं ॐ कवच ध ॐ ॐ नेत्रे ध

प०
६२

62

ॐ ग्रंथं ऐं स्रं: ॐ अस्त्राय इति षडंगं श्रीमत्परात्ममनुजं भितव
क्रहृपोमालैरुग्राग्र्यघटरीपरिक्षीयमानां विद्यात्तमञ्जकलशा
न्दधतीं चक्रझंध्यायेत्समस्तजननीं विघ्नदोषिनेत्रां वामाद्यधःक
रयोराधेत दक्षयोरम्बेरम्याच्चुपरस्थाने श्रुतात्तानसूत्रा ध्ये सोऽहं
तेनमः ध्ये सोऽहं हं नम इति तत्काराद्यकारांतान्संहाररीत्यान्यसे
दिति परमहंसमातृका अथ श्रीकंठादिन्यासः दत्तिणमूर्ति

ऋषिः गायत्रीछंदः श्रीअर्धनारीश्वरोदेवता श्रीदक्षिणाका
लिकांगत्वेनन्यासेविनियोगः धं श्रेकं धं श्रांह्रांहृः धं ह्रुंचं
धं रैंह्रींशिरः धं ह्रुंटं धं ह्रूंह्रस्त्रांशि धं पतं धं पैंह्रैंकव धं ॐ
पं धं ॐह्रौंनेत्र धं श्रंश्रं धं ह्रैं श्रः हस्त्र: अस्त्राय इतिषडंगं ॐ
बेधककोवनतिभेरूचिरातमालांपाशांकुशौचवरदंनिजबा
हुदंडैः बिभ्राणमिंदुशकलाभरणांत्रिनेत्रमर्धांबिकेशमनिशं

प॰ ६३

63

वषट्कारायाय नमः दत्ताय: करमारभ्य रत्नार्धं करपर्यन्तमाशुधन्या
ने ॥ ह्सौः श्रां अनन्तेशाय विरजायै नमः ॥ ह्सौः ईं सूक्ष्मेशाय
शाल्मल्यै नमः ॥ ह्सौः ईं त्रिमूर्तीशाय लोलाक्ष्यै नमः ॥ ह्सौः ईं त्रि
मूर्तीशाय लोलाक्ष्यै नमः ॥ ह्सौः ऊं अमरेशाय वर्तुलाक्ष्यै नमः ॥
ह्सौः ऊं अर्घीशाय दीर्घघोणायै नमः ॥ ह्सौः ऋं भारभूतीशा
य दीर्घमुख्यै नमः ॥ ह्सौः ॠं तिथीशाय गोमुख्यै नमः ॥ ह्सौः

तें स्थाणुकेशाय दीर्घजिह्वायै नमः धं ह्सौः लं दरेशाय
कृशोदर्यै नमः धं ह्सौः पं झिंटीशाय ऊर्ध्वकेश्यै नमः धं
ह्सौः पं झिंटीशाय ऊर्ध्वकेश्यै नमः धं ह्सौः ऐं भौतिकेशा
य विकृतमुख्यै नमः धं ह्सौः ओं सद्योजातेशाय ज्वालामु
ख्यै नमः धं ह्सौः औं अनुग्रहेशाय उल्कामुख्यै नमः धं ह्सौः
अं अक्रूरेशाय श्रीमुख्यै नमः धं ह्सौः अः महासेनेशाय वि

प० २४

64

घात्रुद्र्यैनमः ५ ह्सौंः कंक्रोधेशायमहाकाल्यैनमः ५ ह्सौंः
खंचण्डेशायसरस्वत्यैनमः ५ ह्सौंः गंपंचान्तकेशायसर्वसि
द्धिदायैनमः ५ ह्सौंः घंशिवोत्तमेशायत्रैलोक्यविद्यायैनमः
५ ह्सौंः ङंएकरुद्रेशायमंत्रशक्त्यैनमः ५ ह्सौंः चंकूर्मेशाय
आत्मशक्त्यैनमः ५ ह्सौंः छंएकनेत्रेशायभूतमात्रेनमः ५
ह्सौंः जंचतुराननेशायलंबोदर्यैनमः ५ ह्सौंः झंअजेशाय

ङ्गाविण्यैनमः षं ह्स्रौंः ञंप्रवेशायनागयैनमः षं ह्स्रौः
टंसोमेशायविंचयैनमः षं ह्स्रौंः ठंलांगलीशायमंत्रायै
नमः षं ह्स्रौंः डंदारुकेशायकपिलायैनमः षं ह्स्रौंः ढंअ
र्धनारीश्वरायकीर्तिण्यैनमः षं ह्स्रौंः णंउमाकान्तेशाय
काकोदर्यैनमः षं ह्स्रौंः तंआषाढीशायपूतनायैनमः
षं ह्स्रौंः थंदंडीशायभद्रकाल्यैनमः षं ह्स्रौंः दंअत्रीशा

प॰
९५

65

यघोमिम्येनमः धं ह्स्त्रौं धं मीनेशायघशांतिन्येनमः धं ह्स्त्रौः
नं मेषेशायगाजिन्येनमः धें ह्सौः पं लोहितेशायकालरात्र्यैन
मः धं ह्सौः फं शिखीशायकुब्जिन्येनमः धं ह्सौः वं छगलं
डेशायकपर्दिन्येनमः धं ह्सौः भं द्विरंडेशायवज्रायैनमः धं
ह्सौः मं महाकालेशायजयायैनमः धं ह्सौः यं त्वगात्मनेवा
लीशायसुमुख्येनमः धं ह्सौः रं असृगात्मनेभुजगेशायसु

प्रध्यै नमः ४ ह्सौः रं असृगात्मने भुजगेशाय रेवत्यै नमः ४
ह्सौः लं मांसात्मने पिनाकेशाय माधव्यै नमः ४ ह्सौं वं मेदसा
त्मने खड्गीशाय वारुण्यै नमः ४ ह्सौः शं अस्थ्यात्मने बके
शाय वायव्यै नमः ४ ह्सौः षं मज्जात्मने श्वेतेशाय रक्षोवि
दारिण्यै नमः ४ ह्सौः सं शुक्रात्मने भृग्वीशाय सहजायै न
मः ४ ह्सौः हं प्राणात्मने नकुलेशाय महालक्ष्म्यै नमः ४ ह्सौः

प
११
66

लेशाक्त्यात्मने शिवेशाय व्यापिन्यै नमः ॐ ऐं ह्रीं श्रीं ह्सौः त्वं:
परमात्मने सर्वेशाय महामायायै नमः इति मातृकाध्याने
शुभ्रसेत श्रवरुद्राः स्मेरतारक्ताष्टनष्टलकपालकाः शाक्ये
रुद्रपीठस्थाः सिंहनारुणविग्रहाः रक्तोत्पलकपालाभ्यां
मलंकृतकरांबुजाः इति मूर्तिशक्तीनां ध्याने इति श्रीकंठा
दिन्यासः अथ षोढान्यासः तत्र वीरतंत्रक्रमः ॐ अं ॐ ओं

श्रोंऐंरेंओंइत्यादित्वः ऐंत्वः ऐंइत्यंते १ ऐंऐंग्रं श्रोंऐंश्रोंरेंऐं
रेंइत्यादित्वंऐंत्वंः ऐंइत्यंते २ ह्रींग्रंह्रींह्रींश्रोंह्रींइत्यादि ह्रीं
त्वंः ह्रींइत्यंते ३ ग्रंह्रींग्रं श्रोंह्रींश्रोंइत्यादित्वंह्रींत्वंः इत्यंते ४ क्लीं
ग्रंक्लीं क्लींश्रोंक्लींइत्यादिक्लींत्वंः क्लींइत्यंते ५ ग्रंक्लींग्रं श्रोंक्लीं
श्रोंइत्यादि त्वं क्लींत्वंः इत्यंते ६ श्रींग्रंश्रीं श्रींश्रोंश्रीं इत्यादि
श्रींत्वंः श्रींइत्यंते ७ ग्रंश्रींग्रं श्रोंश्रींश्रोंइत्यादि त्वंः श्रींत्वंः

प॰
९२

इसांते ५ एवं मूलेंक्रौंक्रींक्रंक्रं लंलं ५ केवलेमंत्रेशिरआदि
नः केवलेमंत्रेहृदादिशिरोंते ९ मूलेनाष्टोत्तरशतेनव्यापकं
अर्थात् इसेप्रकारः अथवीरनेत्रेएवान्यक्रमप्रकारः श्रीं श्रें
श्रीं श्रेंश्रीश्रें १ क्लौंश्रींक्लौं २ श्रीक्लींश्रीं ह्रींश्रींह्रीं श्रीं ह्रीं
श्रीं २ मूलेंक्लांक्लांक्रंक्रंक्लीं ५ अनुलोमविलोमेनमातृका
स्थानेकेवलेमूलेविन्यसेत् ९ मूलेनाष्टोत्तरशतेनव्यापकं

67

अर्थात् इति द्वितीयः प्रकारः अथ गौरीसंवादे व्युत्क्रमः के
वलामातृका श्रीं अं श्रीं अं श्रीं अं १ क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं
२ ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं ३ मूलं ह्रां ह्रां क्षं क्षं क्षं क्षं मूलं ह्रां
ह्रां क्षं क्षं क्षं मूलं ह्रां ह्रां क्षं क्षं क्षं ४ अनुलोमविलोमेन मातृ
कास्थाने प्रमूलं ५ मूलं अष्टोत्तरशतं व्यापकं ६ इति तृती
यः प्रकारः अथ रुद्रयामले व्युत्क्रमः अं क्लीं क्लीं क्लीं अं क्लीं

प० ८८

68

क्रींक्रींग्रंक्रींक्रींक्रीं ग्रंहूंहूंग्रंहूंहूंग्रंहूंहूं ग्रंह्रींह्रींग्रं ह्रींह्रींग्रंह्रींह्रीं
३ ग्रंम्लूंलेंग्रं म्लूंलेंग्रंम्लूंले ततअनुलोमविलोमेनमूलं ५ मूले
नाष्टोत्तरशतंव्यापकं ९ अथमातृकान्यासस्तत्र ललाटेना
मिकामध्येविन्यसेन्मुखवृत्तके तर्जनीमध्यमानामाभिर्द्वा
नामेवनेत्रयोः ग्रंग्रंर्कर्णयोर्न्यसेत्कनिष्ठांगुष्ठकोनसोः
मध्यास्तिस्रोगंडयोश्चमध्यमामोष्ठयोर्न्यसेत् अनामांदंत।

योर्मध्यमध्यमामूलमांगके मुखेनामांमध्यमांचहस्तपादेचपार्श्व
योः कनिष्ठानामिकामध्यास्तास्तष्टेचविन्यसेत् हृदयेचतले
सर्वमंसयोश्चककुत्स्थले हन्नवंहस्तपात्कृतिमूलेषुतत्रमेव
च एतास्तमातृकामुद्राः क्रमेणपरिकीर्तिताः अथतत्वन्यासः
मूलाधारंऐंऊंतेआत्मतत्वायस्वाहा इतिपादादिनाभिपर्यंतंन्य
सेत् द्वितीयएंऊंतेविद्यातत्वायस्वाहा नाभ्यादिहृदयांतेत्

प
८८

तीयत्वेंडंनेशिवनत्वायस्वाहा हृदयादिशिरोंतं अथबीजन्या
सः क्रौंनमः ब्रह्मरंध्रे क्रौंनमः भ्रुवोः क्रौंनमः ललाटे ह्रूंनमः
नाभौ ह्रूंनमः गुह्ये ह्रौंनमः मुखे ह्रौंनमः सर्वांगेव्यापयेत्
ततोमूलेननवधापंचधाव्यापकंकुर्यात् अथध्यानयेजनेव
ह्येदृष्टादृष्टफलप्रदं गुरुध्यानेप्रकुर्वीतयथापूर्वंविशुद्ध
धीः स्नायाश्वविमलेतीर्थेहृदयेपुष्करान्विते विंडतीर्थे

यद्वा स्वाधात्मनर्जन्म न विद्यते अथवा उत्तमप्रमाणो शिवनीयके
स्मिन्ज्ञानां बुद्धर्णो ष्वरद्रः शरीरे ब्रह्माण्डभिः स्वातितयोः मध्यः
किं तस्य गांगैरपि पौष्करैर्वा इदं स्नानं शिवशक्त्योः समावेशो
यस्मिन्काले प्रजायते सा संध्या कुलनिष्ठानां समाधिस्थैः प्रती
यते इति संध्योपासनं अथ मूलाधारात् कुंडलिनीं सोमसू
र्याग्निरूपिणीमुत्थाप्य परं बिंदुं निर्भिद्य देहदेवतां तर्पयेत् ते

पु॰ ८॰ उक्तं चंद्रार्कानलसंघट्टगलितं यत्परामृतं तेनामृतेन तद्दिव्यो-
न्नतर्पयेत्परदेवतां अलं धाराप्लोभागे यशाद्देपद्मतमे कला
सारेण संपूर्णं तर्पयेन्नेन विचरी ररुम्ध्येदानं आधारे लिंगना
भौ हृदयसरसिजे तालुमूले ललाटे द्विपत्रे षोडशारे द्विदशाद्दश
दले द्वादशार्धे चतुष्के वासांते बाल मध्ये उफकठसहिते कंठ
देशे स्वरांश्च हृत्ताकोटं डभमध्ये मसर्वविमलधीन्यासपंक्तिप्र

70

सिद्धे इतिमातृकावर्णान्कंठस्यक्रमेणध्यायेत् इयंतमोंत्

का अथषडंगन्यासंकुर्यात् इयंमानहृदयोयंहृदयःस्याच्चि

दात्मकः क्रियतेतन्मात्वेनहृन्मंत्रेणततःपरं सर्वांगादिगुणो

नेगसंविद्रूपेपरात्मनि क्रियतेविषयाहारःशिरोमंत्रेणदेशिकः

शिखिरोहृपवाक्कायमनसाभावनादृढा क्रियतेनिजदेह

स्यशिखामंत्रेणदेशिकः मंत्रात्मकस्यदेहस्यमंत्रध्यानेनतेज

प
८१

सा सर्वेनैव वर्णमंत्रेण क्रियते न्यासस्संहृतिः यद्वा निपरंज्ञानं
संविद्रूपेणगात्मनि हृदयादिसमंतेजः स्यादेतन्मंत्रसंगतं अ
ध्यात्मिकादिरूपं यत्साधकस्य विनाशयेत् अविद्यायानंतंत्रे
यमरंधामसमीरितं इति षडंगं विधाय ध्यानं कुर्यात् शक्तिहृद्य
प्रांतः स्थमलस्य हृदयं संस्थितं ज्योतिस्तत्त्वमयं ध्यायेत्कलाकु
लवियोजनात् अथवा शृंगाटहृदयमध्यस्थं चंद्रभास्करमध्यगं

महाशून्येलयंकृत्वाशून्येतिष्ठतियोगिराट् महाशून्यरतिस्स
र्वोपाधिविनिर्मुक्तमोक्षादिभावविरहात्पूर्णएवभवतीत्यर्थः अ
थवा निरालंबपदेशून्येयत्तेजउपजायते तद्रूपमध्यवेन्निसंध्या
नमेनहियोगिनां तद्रूपंमिथ्येतः कारणमित्यर्थः इतिध्याने ष्वेवं
षड्विधैः षड्भिर्मासमात्रात्तन्मयोभवेत् मासस्तन्मयताबुद्धिःसो
हंभावेनचिंतयेत् विषयपुष्पाणियथाक्रमागमनहंकारमरा

गमममंतया अमोद्द कमरभैंच अद्वेषात्तोभकोनया अमात्म
यंमलोभंचटशपुष्पंविडर्भुपाः अर्हिंसापरमंपुष्पंपुष्पमिंद्रियनि
ग्रहं दयापुष्पंज्ञानपुष्पंतमापुष्पंचपंचमं इत्यष्टसमभिःपुष्पैः
मजयेमरदेवतां इतिमजनं मालापंचाशिकाशोक्तासूत्रे शक्ति
शिवात्मकं ग्रंथिनाकुंडलीशक्तिः हलांतेमेरुसंस्थितिः एवंवि
धिनावर्णमालापुष्पस्रग्वतंमेरुंकृत्वा अकारादिलकारांतेहका

गादिश्रीकंठपर्यंतंमूलमंत्रंसंजप्य परतेजसिजपंसमर्प
येत् अथहोमः अमूलमपरिछिन्नंविभाव्यात्मांतरात्मकं
आत्मज्ञानात्मरूपंचतुरश्रचित्कुंडमानंदमेखलाढ्यकं अथ
मात्राकृतियोनिभूषितंनाभौविभाव्य तन्मध्येज्ञानाग्नौज्वल
याय्या मूलांते मूलाग्नौनाभिचैतन्यरूपविषामनसास्रु
चा ज्ञानप्रदीपितेनिखिलमक्षवृत्तीर्जुहोम्यहं स्वाहा अनेनप्र

प॰ यमाहुतिंदद्यात् ततोमूलांतधर्माधर्महविदीप्ते स्वात्मा ग्नौ
७३ मनसास्रुचा सुषुम्णावर्त्मनानित्यमक्षवृत्तीर्जुहोम्यहं स्वा॰
हा द्वितीयाहुतिंदद्यात् मूलांते प्रकाशाकाशहस्ताभ्यामव
लंब्योन्मनीस्रुचं धर्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यहं
स्वाहा अनेनतृतीयांदद्यात् अंतर्निरंतरनिरिंधनमेधमा
नेमायांधकारपरिपंथिनि संविदग्नौ अस्मिंस्तदद्भुतमरी

73

विभ्रमौविघ्नंजहोमिवत्स्वधादिशिवावसानं श्मेनयंज
नेंकृत्वासाक्षाद्रुद्रत्वमयोभवेत् ततस्सपापपुरुषानिर्जीवस्त
कोभवेद्ध्रुवं अथसाधकोयुवतीवेशंकृत्वा युवतीमेवच
कारयित्वा पीठन्यासंकुर्यात् तत्रांसद्वयोरुद्वयकल्पित
पादचतुष्टयंयोगपीठंनिजदेहंध्यात्वान्यसेत् धं मूलाधा
रेमंद्रकायनमः स्वाधिष्ठाने धं कालाग्निरुद्रायनमः म

प. ७४

शिरसे थं मूलप्रकृत्यैनमः अनादेन थं आधारशक्त्यै
हृदये थं कूर्मायनमः तत्रैवअनन्तायनमः थं वराहा
यनमः थं पृथिव्यैनमः तत्रपश्चिमादिविलोमेन इक्षु
रससमुद्रायनमः मदिरासमुद्राय घृतसमुद्राय दुग्धस
मुद्राय तन्मध्ये श्रें पं नवरत्नविराजितायनवरत्नमयद्वी
पायनमः तन्मध्ये थं श्रें आं ईं ऊं ऐं अं अः पुष्परत्नाय ले

ॐ वैदूर्यरत्नाय दक्षिणे ॐ कं ॐ नीलरत्नाय आग्नेये
ॐ चं विद्रुमरत्नायनमः पूर्वे ॐ टं ॐ मौक्तिकरत्नाय
ऐशाने ॐ तं ॐ मरकतरत्नायनमः ॐ उत्तरे पं ॐ वज्र
रत्नायनमः वायव्ये ॐ यं ॐ गोमेधरत्नायनमः मध्य
खण्डे ॐ शं ॐ पद्मरागरत्नायनमः तन्मध्यखण्डमध्ये ॐ
स्वर्णपर्वताय तदुपरि ॐ नंदनोद्यानाय तन्मध्ये ॐ क

पं.
७५

75

स्वहस्तेभ्योनमः तन्मध्ये धं वसंतादिषड्ऋतुभ्योनमः त
त्वक्षिमे धं इंद्रियाश्वेभ्योनमः तन्मध्ये इंद्रियार्थगजेभ्यो
नमः तन्मध्ये धं विचित्ररत्नभूमिकायैनमः धं करुणा
तोयपरिधयेनमः धं स्वर्णप्राकारायनमः धं चिंतामणि
णिगृहायनमः धं श्मशानायनमः धं पारिजातायन
मः तन्मूले धं रत्नवेदिकायैनमः धं तस्योपरि धं म

णिपीठाय चक्रदिक्ष धं नानाभूतनिगणेभ्यो धं देवेभ्यो
धं वृद्धमांसास्थ्यादिमोदमानशिवेभ्यो धं वृद्धमांसास्था
दिमोदमानशिवेभ्यो धं शवमुंडचितांगारास्थिभ्यो नमः
तदुपरि श्वेतच्छत्राय नमः धं रत्नसिंहासनाय इतिहृ
दयपद्मविन्यस्य धं दक्षांसे धर्माय वामांसे धं ज्ञाना
य वामोरौ धं वैराग्याय दक्षोरौ ऐश्वर्याय मुखे धं

पं०
७८

76

अग्नयेऽथ वामपार्श्वे धं अज्ञानाय नाभौ अवैराग्याय दक्ष
पार्श्वे धं अनैश्वर्याय पुनः हृदि धं वामायैनमः धं विद्या
यै अनंताय धं धर्मायनमः धं आनंदकंदाय धं संवि
ज्ञानाय धं प्रकृतिमयपत्रेभ्यो धं विकृतिमयकेसरेभ्यो
नमः धं पंचाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायैकर्णिकायै
तस्यामेव धं अं अर्कमंडलाय धं ॐ सोममंडलाय धं मंव

ह्निमंडलाय धं संप्रबोधात्मनेसत्वाय धं रंप्रकृत्यात्मनेरज
से धं तंमोहात्मनेतमसे धं ग्रोंग्रात्मनेनमः धं ग्रंग्रंतरात्म
नेनमः धं पंपरमात्मनेनमः धं ह्रींज्ञानात्मनेनमः ग्रहप
द्मेभ्य धं सत्वायैनमः ज्ञानायै धं क्रियायै धं कामदायै धं
कामदायिन्यै धं रत्यैनमः धं रतिप्रियायैनमः धं आनं
दायैनमः कर्णिकायां धं मनोन्मन्यैनमः धं पंपरायै

पः ६७

ऐं अपर्णायै ऐं हिरूपायै ऐं ह्सौः सदाशिवमहाप्रेतपद्मास
नायनमः इतिपीठन्यासः इतिनिजदेहंपीठत्वेनविन्यस्य
श्रीदेवीकामकलारूपंशुक्लबिंदुवदाकारेनहृदयः ऊर्ध्वचतुरस्रकं न
दयः सपरार्धंचचिंतयेत्तदथोशुक्लं इतिहृशास्वात्मानंविविंश
मूलाधारात्कुंडलिनींपराशिवांतंध्यात्वा चेद्दामृतेनसंप्लाव्य
ऊंभग्रद्याशुक्लंशरीरंत्वा सप्तमासाहृदयाष्टदलपद्मेदेवींश्रीः

कालिकांध्यायेत् ॐदेव्याध्यानंप्रवक्ष्यामिसर्वदेवोपसेवि
तं अंजनाद्रिनिभांदेवींकरालवदनांशिवां मुंडमालावली।
कीर्णांमुक्तकेशींस्मिताननां महाकालहृदंभोजस्थितांपी
नपयोधरां विपरीतरतासक्तांघोरदंष्ट्राकरालिनीं नागय
ज्ञोपवीतांचंद्रार्धकृतशेखरां सर्वालंकारसंयुक्तांमुक्ता
मणिविभूषितां मृतहस्तसहस्रैस्तुकृतकांचींदिगंबरां शि

प. ७८

78

वाकोटिसहस्रैस्तुयोगिनीभिस्तुराजितां रक्तपूर्णमुखांभोजांम
धुपानप्रमत्तिकां वह्न्यर्कशशिनेत्रांच रक्तविस्फुरिताननां वि
गतासुकिशोराभ्यांकृतकर्णावतंसिनीं कंठावसक्तमुंडाली
गलद्रुधिरचर्चितां श्मशानालयमध्यस्थां विकटकेशवेष्टितां
सद्यः कृत्तशिरःखड्गवराभीतिकरांबुजां अथवामोर्ध्वहस्तेन
कृपाणेनाधः शिरः तथाद्दत्तहस्तोर्ध्वमभयंतद्योवरामि

त्रिकोद्भवं इति स्वाभेदेन ध्यात्वा श्रीदेवीं मानसोपचारैः सं
पूज्य स्वर्णादिसिंहासने स्वपुरतः श्रीयंत्रे संस्थाप्य शंखं ज
लेनाच्छाद्य तत्र पीठन्यासक्रमेण पीठं संपूज्य स्ववामे षट्को
णं तद्गं त्रिकोणं तद्गं त्रिकोणं विंदुवाह्यवृत्तचतुरस्रात्म
कं मंडलं कृत्वा तत्र च पीठन्यासक्रमेण पीठपूजां विधाय सा
मान्यार्घोदकेनाभ्युक्ष्य तत्राधारशक्तिभ्यो इति पूजयेत् ततो

प॰
७९

नमस्त्वाधारंप्रक्षाल्य रंवह्निमंडलायदशकलात्मनेनमः २
तिप्रमृज्य फडितिकलशंप्रक्षाल्य कारणेनप्रपूर्य रक्तवस्त्र
माल्यादिनाभूषयित्वा देवीतुद्यासेस्थाप्य अंअर्कमंडला
यद्वादशकलात्मनेनमः कलशेसंमृज्य ॐचंचंद्रमंडलाय
षोडशकलात्मनेनमः इतिद्रव्येसंमृज्य फडितिसंरक्ष्यहुमि
त्यवगुंठ्य मूलमंत्रेणसंवीक्ष्य नमस्त्वभ्युक्ष्य मूलेनगंधमा

नीय ॐमेशुष्ठंदत्वा शापमोचनंकुर्यात् एकमेवपरंब्र
ह्मस्थूलसूक्ष्ममयंध्रुवं कचोद्भवांब्रह्महत्यांतेनतेनाशया
म्यहं सूर्यमंडलसंभूतेवरुणालयसंभवे श्रमावीजमयेदे
विशुक्रशापाद्विमुच्यतां वेदानांप्रणवोवीजंब्रह्मानंदमयो
यदि तेनसत्येनहेदेविब्रह्महत्यांव्यपोहत एवंमंत्रत्रयेणैव
अभिमंत्र्यसुरांशुभां प्रदद्यात्कालिकायैचततोनैवेद्यमाभ

प· ८·

80

वेत् इतिमंत्रत्रयंचादंष्ट्रत्वात्रिधापठित्वा ॐवांवींवूंवैंवौंवः ब्र
ह्मशापविमोचितायैसुरादेव्यैनमः इतिवारत्रयंतदुपरिपठित्वा
ह्रौंश्रींक्रांक्रींक्रूंक्रैंक्रौंक्रः सुराकृष्णाशापंविमोचयामृतं
स्रावय २ स्वाहा इतित्रिर्जपित्वा ॐहंसः शुचिषद्वसुरंतरिक्ष
सद्धोतावेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा
गोजाऋतजाअद्रिजाऋतं इत्यादिभिः इत्यमध्येग्रानंदभै

वैभरवोध्यायेत सूर्यकोटिप्रतीकाशंसोमकोटिसुशीतलं अ
ष्टादशभुजंदेवंपंचवक्त्रंत्रिलोचनं अमृतार्णवमध्यस्थंमहाब्रा
ब्जोपरिसंस्थितं वृषारूढंनीलकंठंसर्वाभरणभूषितं कपाल
खट्वांगधरंघंटाडमरुवादिनं पाशांकुशधरंदेवंगदामुसल
धारिणं खड्गखेटकपट्टीसंमुद्गरंमूलदंडकं विचित्रखेटकं
मुंडवरदाभयपाणिकं लोहितंदेववदेवेशंभावयेत्साधकोत्तमः

८१

एवमानन्दभैरवं ध्यात्वा ह्सक्षमलवरयूं आनन्दभैरवाय
वौषट् इत्यानन्दभैरवमंत्रेण वारत्रयं संपूज्य आनन्दभैरवीं
ध्यायेत् भावयेच्च सुरां देवीं चन्द्रकोटियुतप्रभां हिमकुन्देन्दु
धवलां पंचवक्त्रां त्रिलोचनां अष्टादशभुजैर्युक्तां सर्वानन्दक
रोद्यतां प्रहसन्तीं विशालाक्षीं देवदेवस्य संमुखीं सहक्षमल
वरयूं सुरादेव्यै वौषट् इत्यानन्दभैरवीं संपूज्य हृत्पद्ममध्ये

शक्तिचक्रं त्रिपंक्त्यादलिंगत्वेनैन अं १६ कं १६ थं १६ इति
क्रमेण विलिख्य मध्ये हंसः विलिख्य शिवशक्त्योः समा
वेशात्तन्मध्येऽमृतं विचिंत्य धेनुमुद्रयाऽमृतीकृत्य व
ह्निवरुणबीजं मूलमंत्रमपि अष्टधा जप्त्वा पठित्वा
श्रीविद्योक्तक्रमेण अर्घ्यपात्रस्थापनं कुर्याद्यथा आत्मश्री
चक्रयोर्मध्ये हूंकारेण त्रिकोणषट्कोणवृत्तचतुरस्रात्म

ए॰ ८२

कंमंडलंविलिख्य चतुरस्रे पूर्णगिरिपीठायनमः उड्डि
यानपीठायनमः कामरूपपीठायनमः जालंधरपीठाय
नमः इतिसंपूज्य षट्कोणेषडंगंसंपूज्य मूलखंडत्रयेण
त्रिकोणस्याग्रेदलेउभयेरेचसंपूज्य मध्येआधारशक्तीःसंपू
ज्य त्रिकोणगर्भंषट्कोणभूषितांयंत्रिकांसंस्थाप्य इति
सामान्यार्घजलेनाभ्युक्ष्य वह्नेर्दशकलाःपूजयेत यंभ्रूम्रा

82

र्चिषेनमः रंऊष्मायैनमः लंज्वलिन्यैनमः वंज्वालिन्यैन
मः शंविस्फुलिङ्गिन्यैनमः षंसुश्रियै संस्वरूपायै हंकपि
लायै लंहव्यवाहायै क्षंःकव्यवाहायैनमः इतिसंपूज्य म
ध्येमंवह्निमण्डलायदशकलात्मनेनमः इतिपूजयेत् त
तः षट्कोणेषडङ्गंसंपूज्य नारिकीलादिपात्रंफडितिप्रक्षा
ल्य त्रिपादिकोपरिसंस्थाप्य तत्रसूर्यमण्डलकलाः पूज

पू॰
८२
83

पूजयेत् कंभंनतपिन्यैनमः खंबंनाविन्यै गंफंधूम्रायै घंपं
मरीच्यै ङं.नंज्वालिन्यैनमः चंधंरुच्यै छंदंसुषुम्नायै जं
थंभोगदायै झंतंविश्वायै ञंणंबोधिन्यै टंढंधारिण्यैनमः
ठंडंक्षमायैनमइतिसंपूज्य ॐअग्निमंडलायद्वादशकला
त्मनेनमः इतिपूजयेत् ततस्त्रिकोणवृत्तषट्कोणपात्र
मध्येसंलिख्य समस्तेनव्यस्तेनचमूलमंत्रेणसंपूज्य वामि

स्वस्तबीजं मूलमंत्रं विलोममातृकां च पठन् घटस्य का
रणामृतेन त्रिकोणाग्रपूर्य्ये जलेन भागमेकं पूरयेत् ततो
दूर्वाक्षतरक्तपुष्पबिल्वपत्रनानासुगंधद्रव्याणि तत्र निक्षि
प्य सोममंडलं द्रव्ये पूजयेत् अं अमृतायै नमः आं मानदा
यै इं पूषायै ईं तुष्ट्यै उं पुष्ट्यै ऊं रत्यै ऋं धृत्यै ॠं शशिन्यै
ऌं चंद्रिकायै ॡं कांत्यै एं ज्योत्स्नायै ऐं श्रियै ओं प्रीत्यै

पं॰
८४
84

ऐंगदायै ॐ श्रीं शर्ण्यै ग्रं: शर्ण्यमनायै नम इति संपूज्य ॐ सो
ममंडलाय षोडशकलात्मने नम इति पूजयेत् ततः पूर्वव
त्कारणे मंत्रं विलिख्य त्रिकोणत्रिरेखायां ग्रं १९ कं १९ यं १९
इति त्रिलिखित्वा मूलखंडत्रयेण त्रिकोणं संपूज्य षट्कोणे
षडंगं संपूज्य गंगेत्यादिनाः ऊश्चमुद्रया सूर्यमंडलान्नीयमा
वाह्य आनंदभैरवभैरव्यौ तन्मंत्रेण संपूज्य शक्त्यादिक्रमेण

पंचरत्नं पूजयेत् ग्लूं गगनरत्नेभ्यो नमः स्लूं स्वर्गरत्ने-
भ्यो नमः स्लूं पातालरत्नेभ्यो नमः म्लूं मर्त्यरत्नेभ्यो नमः
मध्ये न्लूं नागरत्नेभ्यो नमः इति पूजयेत् ततो द्रव्यमध्ये
मांसमीनमुद्राकुंडगोलादिकं च संशोध्य निक्षिपेत् तेषां शु-
द्धिर्यथा ॐ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुच
रो गिरिष्ठाः यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवना

पा०
८५
85

निविष्णा इति द्वितीयांशोधनेन त्र्यंबकं यजामहे सुगंधिं
पुष्टिवर्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्
इति मीनमुद्रा: तद्विष्णोः परमं पदं सदा पश्यंति सूरयः
दिवीव चक्षुराततं तेन हि शासो विपश्यवो जाग्रवांसः समिंध
ते विष्णोर्यत्परमं पदं इति मुद्राशोधनं विष्णुर्योनिं कल्प
यतु त्वष्टा रूपाणि पिंशतु आसिंचतु प्रजापतिर्धाता गर्भं

दध्यात्तेन गर्भं देहि सिनीवालि गर्भं देहि सरस्वति गर्भं दे
ह्यश्विनौ देव्यावाधत्तां पुष्करस्रजौ ऐं ह्रीं सौः क्लीं जुं सः अमृते
अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय २ स्वा
हा इति कुण्डगोलादिशुद्धिः ततः सर्वेन्द्रमित्यवगुण्ठ्य धेनुमु
द्रयामृतीकृत्य तालत्रयं दशदिग्बन्धनं च कृत्वा तदुपरि मू
लेन समधाजपित्वा ऐं क्लीं सौः अम्लोंडरमसंभनमशेषरस

प॰ ८९ 86

संभवं श्रामृतेन महामायं पीयूषरसमावह ऐं ग्लंवेंडेंकरमा
नेटकेरेपरस्वधान्मनि स्वच्छंदस्फुरणामत्रनिधेह ऊलहृपि
णि क्लौं ग्रऊहस्मामृतनाकारेसिद्धित्वानकरेपरे ग्रमृतत्वंनि
धेयास्मिन्नस्तनिक्लिन्नहृपिणि सौः तद्रूपेणोकरस्यं चकृत्वा
स्येनतत्वहृपिणि भूत्वापरामृतनाकारेमयिचित्स्फुरणांऊरु ग्र
नेनकारणमामंत्र्यनतदेवीमावाह्य नानत्रयदिग्वंधनेकृत्वाऽ

वर्तुलं धेनुमुद्रयामृतीकृत्य योनिमुद्रां प्रदर्श्य षडंगेनस
कलीकृत्य मत्स्यमुद्रयापात्रमाच्छाद्य मूलमंत्रंदशधाजप्त्वा
देवीस्वरूपंपात्रंविभावयेत् पात्रंचप्रतारसमयपर्यंतंमलि
नेनकार्यं ततोदेव्याःसांगृहीत्वा वटश्रीपात्रयोर्मध्येपात्रा
णिस्थापयेद्यथा वटसमीपेगुरुपात्रं ततोभोगपात्रं ततः
शक्तिपात्रं योगिनीपात्रं वीरपात्रं बलिपात्रं स्वपात्रं पाद्य

पात्रं अर्घपात्रं आचमनीयपात्रं च क्रमेणसामान्यार्घपा
त्रवत्स्थापयेत्पूजयेच्च ततोमत्स्यमांसघृतकारणेनतत्त्वशु
द्ध्या श्रीपात्रात्सस्रुक्गृह्य हस्तरत्नमलवषयं आनंदभैरवाय
वौषट् आनंदभैरवं तर्पयामीतित्रिस्त्रेणत्रिः संतर्प्य ततः
श्रीमच्छ्रीगुरुकानंदनाथश्रीपादुकां श्रीगुरुकांवा श्रीपादु
कांवतर्पयामिनमः इतित्रिः सकृद्वासंतर्प्य एवंपरमगुरु

परमाचार्यपरमेष्ठिगुरून्संतर्पयेत् ततः श्रीपादशमूलेन
च मूलं साङ्गं सवाहनं सपरिकरं श्रीदक्षिणकालिका
श्रीपादुकां तर्पयामि नमः इति त्रिः संतर्प्य तत्वशुद्धिं कुर्यात्
ॐ प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं विर
जा विपाप्मा भूयासं स्वाहा १ ॐ पृथिव्यप्तेजोवाय्वाकाशा
मे शुध्यन्तां इति २ ॐ प्रकृत्यहंकारबुद्धिमनः श्रोत्राणि मे शु

५०
८८

ॐ नं २ ॐ त्वक्चक्षुजिह्वाघ्राणवचांसि मे शुध्यंतां ४ ॐ पाणिपादपायूपस्थपाशह्वामे शुध्यंतां ५ ॐ स्पर्शरसरूपगंधाकाशानि मे शुध्यंतां ६ ॐ वायुतेजः सलिलभूम्यात्मनो मे शुध्यंतां ७ इति सप्तमंत्रामष्टेद्विति तत्वशुद्धिः ततः स्वपात्रान्स्तमंत्रेणाविंडस्त्रीकारं कृत्वा श्रीपात्रामृतेनात्मानं पूजोपकरणानि चाभ्युक्ष्य तस्मात्सर्वं ब्रह्ममयं भवेदिति ततश्चक्रस्य

88

पूर्वेदक्षिणेपश्चिमेउत्तरेचत्रिकोणंहृत्वविलिख्य ॐश्रीं
क्षंमंडलायनमः इतिमंडलानिसंपूज्य पूर्वेवांवटुकाय
नमइतिपाद्यादिनासंपूज्य अर्घंपूर्णंसलिलमीनमांस
पुष्पैर्वलिंउपस्कृत्य वलिपात्रस्यकारणेनवामांगुष्ठा
नामाभ्यां ॐएह्येहिदेवीपुत्रवटुकनाथकपिलजटाभा
रभास्वरत्रिनेत्रज्वालामुखसर्वविघ्नान्नाशयर सर्वो

प०
८९

पचारसहितं बलिं गृह्ण २ स्वाहा एषबलिः वटुकाय नमः
इति उत्सृजेत् दत्तिणे यां योगिनीभ्यो नमः इत्यभ्यर्च्य ऊर्ध्वं ब्रह्मां
डतो वा दिविगगनतले भूतले निस्तले वा पाताले वा वने वा स
लिलपवनयोर्यत्र कुत्रस्थिता वा क्षेत्रपीठोपपीठादिषु च कृतप
दा धूपदीपादिकेन प्रीताः देव्याः सदानः शुभ बलिविधिना पां
तवीरेंद्रवंद्याः यां योगिनीभ्यः स्वाहा सर्वयोगिनी हूं फट् स्वा

हा एषबलिर्योगिनीभ्योनमः इतितर्जनीमध्यमानामां
ष्ठैर्योगिनीबलिः पश्चिमे ह्रांक्षेत्रपालायनमः इतिसंपू
ज्य ह्रांह्रींह्रूंह्रैंह्रौंह्रः स्थानक्षेत्रपाल धूपदीपादिसहितंब
लिं गृह्ण २ स्वाहा एषबलिः क्षेत्रपालायनमः इतिवामांगु
ष्ठिं कृत्वातर्जनींप्रसार्याविधाय क्षेत्रपालबलिमुत्सृजेत् उत्त
रे गांगणेशायनमः इतिसंपूज्य गांगींगूंगैंगौंगः गणपत

प॰
५॰

येवरवरद सर्वजनं मे वशमानय बलिं गृह्ण २ स्वाहा एषब
लिर्गणेशाय नमः इति दंडाकारांगुलीमध्यमुक्ताः कृत्वा बलिं
दद्यादिति गणेशबलिः अथ स्ववामे मंडलं कृत्वा पूर्ववत्संपूज्य
तत्र साधारं बलिं संस्थाप्य मूलेनाभिमंत्र्य तत्र धूपदीपादिना स
र्वभूतानां पूज्य ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा ए
षबलिभ्यो सर्वेभ्यो भूतेभ्यो नमः इति इति तत्त्वमुद्रया बलिं दद्यात्

एतत्पंचबलिंदत्वा सर्ववत्वडंगंविधाय कामकलांध्यात्वा
तरुणादित्याकारारुणंसमांजलिंकूर्ममुद्रयागृहीत्वा मू
लाधारात्कुंडलिनींब्रह्मपथेनपरमशिवपर्यंतंविभाव्य हृदया
ष्टदलेसमानीय मूलेनमूर्तिंपरिकल्प्य पूर्वोक्तरूपांध्यात्वावा
ग्बीजेनवहन्नासापुटेनदेवींस्वहृदयात्कुसुमांजलावानीय
यंत्रमध्येसमावाहयेत्. ॐदेवेशिभक्तिसुलभेपरिवारसम

प०
९१
91

न्विते यावत्त्वां पूजयिष्यामि तावद्देवि इहावह इतियंत्रमध्ये
देवीं संस्थाप्य आवाहयेत् मूलं श्रीमहाकालसहिते दक्षिणे
कालिके इहागच्छ २ इह तिष्ठ २ इह सन्निहिता भव २ इह सन्नि
रुद्धा भव २ मम पूजां गृहाण २ इत्यावाहनादिमुद्राः प्रदर्श्य पू
र्वोक्तजीवन्यासं लेलिहानमुद्रयांकुशविष्टरेण वा कृत्वा इमि।
स्ववशं त्वा सकलीकृत्य छोटिकाभिर्दशदिग्बंधनं विधाय ॥ म

तमुद्दयाऽग्रतीकृत्य योनिमुद्रां प्रदर्शयेत् वराभयपरयोनीप्रदर्शय
रश्मिहृदद्देवताश्चावाहयेत् कालीकपालिनीॐह्लांॐरूॐह्लां
विरोधिनी विप्रचित्ताउग्राउग्रप्रभादीप्तानीलाघनावलाकामा
मुद्रासिता एताःसर्वाः श्यामाश्चासिकरामुंडमालाविभूषिताः
तर्जनीं वामहस्तेन धारयंत्यःशुचिस्मिताः इतिषडादिपंचदश
कोणेक्रमेणध्यात्वा बाह्याष्टदलपद्मेब्रह्म्यादिकाध्यात्वाऽवा

प·
८२

92

हृयेत् ब्राह्मीं हंससमारूढां स्वर्णवर्णां चतुर्भुजां चतुर्मुखीं
त्रिनेत्रां चाक्षवलयकूर्चं च पंकजं खड्गपात्रस्रुचं च दधतीं चारुहा
सिनीं जटाजूटधरां देवीं भावयेत्साधकोत्तमः नारायणीं म
हादीप्तां श्यामां गरुडवाहनां नानालंकारसंयुक्तां चारुकेशीं
चतुर्भुजां चंद्रां खड्गकपालं च चक्रं च दधतीं परां मधुमत्तमदो
ल्लासिताक्षिं सर्वांगसुंदरीं माहेश्वरीं वृषारूढां शुक्लां त्रिनय

नाञ्चितां कपालं डमरुं चैव वरदाभयशूलकं टंकं च दधतीं
देवीं नानाभरणभूषितां त्र्यक्षां साट्टहासां विकटितदशनां
भीमवक्त्रां त्रिनेत्रां नीलांभोजप्रभाभाप्रमुदितवदनां मुंडमा
लाविभूषां खड्गं शूलं कपालं नरशवघटितं खेटकं धारयंतीं
प्रेतारूढां प्रमत्तां मधुमदमुदितां भावयेच्चंडरूपां कौमा
रीं कुंकुमाभां च त्रिनेत्रां शिखिवाहनां चतुर्भुजां शक्तिपाशां

प॰ १३
९३

अंकुशाभयधारिणीं नानालंकारसंयुक्तां प्रमत्तां परिचिंतयेत् अपराजितांचपीनाभामत्तस्त्रवरप्रदां कमलेमालतीगं चदधतीं परिचिंतयेत् वाराहींधूम्रवर्णांचवराहवदनांशुभां फलकंखड्गमुसलंहलंचैवभुजेर्दधतीं नारसिंहीनृसिंहस्य विभ्रतीसदृशंवपुः इतिध्यात्वानदहिरष्टदलस्योपरिउपरिहे तुवटुकादिभैरवान्‌रुरुवटुकादिभैरवांश्चयोगिनीं श्चइंद्रा

यांश्चाङ्गुष्ठांश्चाऽणिमादिसिद्धीश्च ध्यायेत् ततः बिन्दौ मू-
ले श्रीमहाकालसहितश्रीदक्षिणकालिकापादुकायै एत-
त्पाद्यं नमः इति पादयोः पाद्यं एवमर्घ्यं स्वाहा शिरसि आच-
मनीयं स्वधा मुखे मधुपर्कं स्वधा मुखे स्नानीयं नमः सर्वा-
ङ्गे एवं मूलान्ते गन्धो नमः इति मध्यमानामाङ्गुष्ठैर्गन्धं मू-
लान्ते पुष्पाणि वौषट् इत्यङ्गुष्ठतर्जनीभ्यां पुष्पं सात्ता।

प॰ ९४

94

स्त्वयंभूकुसुमं दत्त्वा धूपपात्रे फडिति संपूज्य ओं तेजः स्थापयि
त्वा वामतर्जन्या संस्पृशन् ओं पात्रमन्त्रेण संशोध्य धूपं निवे
दयामीति निवेद्य ओं ह्रीं जगद्ध्वनिमन्त्रमातः स्वाहेति घंटां सं
पूज्य वामेन घंटां वादयन् मध्यमानामांगुष्ठैर्धूपं धृत्वा गाय
त्रीं मूलमन्त्रं च पठन् त्रिधोत्तोलनं कृत्वा देवीं धूपयेत् ततो दी
पं संपुटे संस्थाप्य पूर्ववन्मोत्तणमूजनं कृत्वा वाममध्यम

यादीपपात्रं स्पृशन् मूलं श्रीदक्षिणाकालिकाश्रीपादुका
यै दीपं निवेदयामि नमः इति निवेद्य पूर्ववद्घंटां वादयन्मध्य
मानामिकामध्ये अंगुष्ठेन दीपपात्रं धृत्वा दर्शयेत् ततो नैवे
द्यं स्वर्णादिपात्रे संस्थाप्य इमिन्त्रवर्णेध्यावमिति धेनुमुद्रयाऽ
मृतीकृत्य मूलेन उपरि सप्तधा जप्त्वा वामांगुष्ठेन नैवेद्यपात्रं स्पृ
शन् मूलं श्रीदक्षिणाकालिकापादुकायै नैवेद्यं निवेदयामि

पु॰
९५

93

नमइतिदक्षिणहस्तानामांगुष्ठाभ्यामुत्सृजेत् पुनराचमनीयं
दत्वा मूलं श्रीदक्षिणकालिकाश्रीपादुकायैकर्पूरादियुक्तंतां
बूलंनिवेदयामिनमइतिएवंदद्यात् सर्वेपात्रस्थपात्रजले
नोत्सर्गःकार्यः ततस्तत्वमुद्रयाधाम्नेनेनदेवीं त्रिःसंतर्प्य प्र
ववद्योनिमुद्रादिकंदर्शयेत् अथकृतांजलिः श्रीदक्षिणेका
लिकेआवरणंतेपूजयामिनमः इत्याज्ञांगृहीत्वा विंदोःआ

ग्नेये हृदयशक्तिश्रीपा० पू० त० ईशाने शिरःशक्तिश्री० नैरृ
तेशिखाशक्तिश्री० दिक्ष्वस्त्रशक्तिश्री० एताश्चतस्रःस्फ
टिकपद्मरागनीलकृष्णारुणाभिविभः वरदाभयधारिण्यः श्व
धानतनवः स्त्रियः इतिध्यात्वापूजयेत्पर्यन्ततः वाया
व्यादितः ईशानपर्यन्तंगुरुपंक्तिंपूजयेत् गुरुपादुकामंत्रांते
श्रीअमुकानंदश्रीपादुकांअमुकाम्बाश्रीपादुकांवपू० त० मि

प॰
९९

९८

तिसंसज्य एवंपरमगुरूंपरमाचार्यंपरमेष्टिगुरूंचसंसज्यसं
तर्प्यादिव्यौघासिद्धौघमानवौघगुरून् ॐमहादेव्यम्बा श्री
पा॰ पू॰ त॰ महादेवानंदनाथश्रीपा॰पू॰ त॰ त्रिपुरभैरवश्री॰
इतिदिव्यौघं ब्रह्मानंदनाथश्री॰ पूर्णदेवानंदनाथश्री॰ च
लचित्तानंदनाथश्री॰ चलाचलानंदनाथश्री॰ कुमारानंदश्री॰
क्रोधानंदनाथश्री॰ वरदा॰ स्मरदीपनाथश्री॰ मायाम्बा॰

श्री॰ मायावत्सम्बाश्री॰ रतिसिद्दोयं विमलानंदनाथश्री॰
ऊशतानंदनाथश्री॰ भीमसेनानंदनाथश्री॰ गोरत्तानंदनाथ
श्री॰ भोजदेवानंदनाथश्री॰ स्वधाकरानंदनाथश्री॰ मीना
नंदनाथश्री॰ मूलदेवानंदनाथश्री॰ प्रजापत्यानंदनाथश्री॰
रंतिदेवानंदनाथश्री॰ विघेश्वरानंदनाथश्री॰ हुताशनानं
दनाथश्री॰ समयानंदनाथश्री॰ संतशानंदनाथश्री॰ रति

पा॰
१७

मानवौघं पूजयेत्तर्पयेच्च मानवौघांते गुरुः श्रीस्वगुरुं पूज
येत्तर्पयेच्च मानवौघांते गुरुः श्रीस्वगुरुं पूजयेत्तर्पयेच्च
ततोबाह्यत्रिकोणस्यसंमुखं ॐकालीश्रीपा॰पू॰त॰ तद
ले ॐकपालिनीश्री॰ तद्वामे ॐकुल्लाश्री॰ तदंतस्त्रिकोणे
ॐकुरुकुल्लाश्री॰ विरोधिनीश्री॰ विप्रचित्ताश्री॰ तदंतस्त्रिकोणे ॐ
उग्राश्री॰ ॐउग्रप्रभाश्री॰ ॐदीप्ताश्री॰ तदंतस्त्रिकोणे ॐनी

लाम्बी· ॐचनाम्बी· ॐबलाकाम्बी· ततंतान्निकोणे ॐ
मायाम्बी· ॐगुह्याम्बी· ॐमित्राम्बी· इति संपूज्य योगिनीपा
त्रामृतेनतत्त्वशुद्ध्यातर्पयेत् ततोदेव्यादक्षिणे ॐह्रींसौं
ह्सौं हूंमहाकालाय ह्रौं महादेवाय क्रौं कालिकायै ह्रीं श्रीं म
हाकालभैरवश्रीपा· पू· त· इति पूजयेत् श्रीपात्रामृतेनत
र्पयेच्च ततोऽष्टदलमूले ॐ श्रांब्राह्मीश्री· ॐईंनारायणी

प॰
१८

ष्ठी॰ ॐकंमाहेश्वरीष्ठी॰ ॐक्लंचामुंडांष्ठी॰ ॐल्हंकौमारीष्ठी॰
ॐपंअपराजिताष्ठी॰ ॐॐवाराहीष्ठी॰ ॐअंनारसिंहीष्ठी॰ इ
तिसर्वादिनःस्ववामावर्तेनपूजयेद्योगिनीप्राज्ञामन्तेनतर्प
येच्च नासासमीपेअष्टदलपद्मपेंह्रीअंहेत्नवटुकभैरवष्ठी॰
पेंह्रींइत्रिपुरांतकवटुकभैरवष्ठी॰ पेंह्रींरंतिवेतालव॰ पें
ह्रींअंअग्निजिह्वाव॰ पेंह्रींल्हंकालवटुक॰ पेंह्रीपंकरालवटु॰

98

ऐंह्रींॐएकपादव॰ ऐंह्रींअंभीमव॰ ततोहृदलपवनडपरि
प्रकाशितोवामावर्तेन ऐंह्रींअंआसिताङ्गभैरवश्री॰ ऐंह्रीं
उंरुरुभै ऐंह्रींउंचण्डभैरवश्री॰ ऐंह्रींॠंक्रोधभैरवश्री॰ ऐं
ह्रींलृंउन्मत्तभैरवश्री॰ ऐंह्रींएंकपालिभै॰ ऐंह्रींऐंभीषणभै॰
ऐंह्रींअंसंहारभै॰ पा॰ त॰ नमस्कृत्यजपेद्धीरःपाशमन्त्रेणतत
पयेच्च ततःऐंह्रींक्लींफट्स्वाहा चतुष्षष्टियोगिनीश्री ६

प. ९६

इति कर्णे ग्रथः दक्षे वामे च अग्रे पृष्ठे च सृज ये योगिनो याथाम्रे तेन
तर्पयेत् ततः पत्राग्रे पूर्वादितः स्ववामावर्तेन ऐं ह्रीं सिंहव्या
घ्रवक्त्रे श्री· ऐं कां कां मयूरवक्त्रे श्री· ऐं मां मां मगमेषव
क्त्रे श्री· ऐं वैं वैं गजवाजिवक्त्रे श्री· ऐं मैं मैं विडालास्यव
क्त्रे श्री· ऐं क्लौं क्लौं क्रोशास्यवक्त्रे श्री· ऐं ह्रां ह्रां ह्रस्वदीर्घव
क्त्रे श्री· लंबोदरमहोदरीश्री· ऐं ह्रीं ह्रीं ह्रस्वजंघातालजंघा

99

मंतंवौषीश्री· इतिमन्त्रजपेयोगिनीपाद्यामृतेनतर्पयेच्च ततोह
तेलंइन्द्रशक्तिश्री· रंअग्निशक्तिश्री· टंयमशक्तिश्री· तंनिऋ
तिशक्तिश्री· वंवरुणशक्तिश्री· यंवायुशक्तिश्री· संसोम
शक्तिश्री· हंईशानशक्तिश्री· ईंईशानयोर्मध्ये ग्रांब्रह्मश
क्तिश्री· निऋतिवरुणयोर्मध्ये ह्रींअनंतशक्तिश्री· इतिमन्त्रज
पेद्वीरपाद्यामृतेनतर्पयेच्च ततश्चान्तरश्चैवज्रशक्तिश्री· श

प· क्तिशक्तिश्री दंडशक्तिश्री· खड्गशक्तिश्री· पाशशक्तिश्री·
१०·· ध्वजशक्तिश्री· गदाशक्ति· त्रिशूलश· पद्मश· चक्रश·
इति पूजयेत्तर्पयेच्च ततश्चतुरस्र एव देव्यग्रादिद्वारच
तुष्टये अणिमासिद्धिश्री· लघिमासिद्धिश्री· महिमा
सि· ईशित्वासि ततः कोणचतुष्टये वशित्वासि प्राका
म्यासि· भुक्तिसि· इच्छासि· निऋतिवरुणवायोमध्ये प्राप्ति

सि॰ इंद्रेशानयोर्मध्ये सर्वकामसि इतिसंपूजयेत्तर्पयेच्च
ततो देवीवामोर्ध्वहस्ते ॐ वरदशक्तिणी॰ ऐं तदधः ॐ अंकु
शशक्तिणी॰ दक्षोर्ध्वहस्ते ॐ अभयशक्तिणी॰ तदधः ॐ
वरशक्तिणी इति संपूज्य संतर्प्य च सर्वदेवतादेव्यग्रसंमु
खां ध्यात्वा षडंगं विन्यस्य पूर्ववद्देवीं ध्यात्वा गंधपुष्पा
क्षतादिभिः पुनर्दत्वा घंटां वादयन् धूपदीपौ प्रदर्शयेत्

प० १०१

101

दैवत्यानादिकंनैवेद्यादिकंचनिवेद्याद्भिः संतर्प्य पुष्पां
जलित्रयेणदेवींत्रिः संपूज्य सायुधसवाहनसपरिकरस
परिवारश्रीमहाकालसहितश्रीदक्षिणाकालिकाश्रीपा
दुकांपूजयामिनमइति पुष्पांजलित्रयेणात्रिः संपूज्यात्रिः
श्रीपात्रामृतेनतर्पयेत् ततोयोनिमुद्रादिकंप्रदर्शये
त् ततोग्निमानीयस्थंडिलेऊंउबानितिप्पमलेनाभ्युसा

भिमंत्र्यदेवीरूपंध्यात्वाभिषिच्य मूलेनश्रीदक्षिणाका॰
लिकायैनमः इतिगंधादिनासंपूज्य आज्यादिकमा॰
नीय वामिस्थमृतीकृत्य मूलेनत्रिरभिमंत्र्यतेनहविषा
मूलांतेश्रीदक्षिणाकालिकायैस्वाहा इतियथाशक्तिद
त्वा आवरणानामपिस्वाहांतेनैकैकामाहुतिंहुत्वापुन
र्मूलदेव्यैहुत्वा प्राणायामादिपूर्वकंवह्निदेवतांविसृज्य

पु॰
९२

भस्मनातिलकंकृत्वाः स्मिद्धेवावसरेक्षागादिवलिंदद्यात
तत्रपञ्चमूलेनसंस्थाप्य मूलेनगंधस्त्रगादिभिरलंकृत्यदेव्या
ग्रेसंस्थाप्यमूलेनप्रोक्षणीनलेनप्रोक्ष्यास्त्रेणसंरक्ष्यकवचे
नाःवगुंठ्यमूलेनवामितिधेनुमुद्रयामृतीकृत्य सर्वदेव
तारूपिणेवलिरूपायाघ्रकपद्वेनमइतिगंधादिनाभिः
संपूज्य तस्यदत्तकरौ पञ्चपाशायाविघ्नदेविघ्नकर्णायधी

102

महितन्त्रोजीवः प्रचोदयात् इतिपञ्चगायत्रीभिः पठित्वा
प्रान्तः खट्वं निधाय ऐंह्रींकलिकलिवज्रेश्वरिलोहदंष्ट्रा
यैनमः इतिगंधादिनाभ्यर्च्य तस्यपूर्वे वागीश्वरीब्रह्मा
भ्यांनमः मध्ये लक्ष्मीनारायणाभ्यांनमः अग्रे उमामहे
श्वराभ्यांनमः इतिसंपूज्यतं प्रत्वामंत्रयेत् ॐत्वङ्गयाम
रनाशायदेवकार्यार्थंतत्परः पञ्चक्लेशस्त्वयाशीघ्रंरवा

प० १०३

103

ॠनायनमोस्तुते इत्यभिमंत्र्यगंधाक्षतजलादिकमानीय
मूलमद्यामुकमासस्येत्यादि अमुकगोत्रामुकशर्माऽमु
ककामः श्रीमहादक्षिणेकालिके इमंपशुंतुभ्यमर्पयामि
अहंसंप्रसीद इति पठित्वा पशोःशिरसिनिक्षिप्यतच्छिरोऽ
त्वा ॐ यज्ञार्थंपशवः सृष्टा यज्ञार्थंपशुघातनं अतस्त्वांघा
तयिष्यामितस्माद्यज्ञेवधोऽवधः शिवायत्वमिदंपिंडमत

त्वंशिवतांगतः उत्तिष्ठस्वपशोत्वंहिनाशिवस्त्वंशिवोसि
हि इतिसंबोधयित्वाखड्गमादाय ॐक्रः अस्त्रायफट् छिंधि
छिंधिस्वाहा इतिखड्गंतस्यस्कंधेयोजयेत् ततःस्वयंदेवीरू
पोभूत्वा निर्विकल्पएकेनप्रहारेणछिंद्यात् सविकल्पश्चे
त्परहस्तेनछेदयेत् अत्रैवब्राह्मणातिरिक्तैः खरकादिकंद
द्यात् अथोत्तरेत्रिकोणमंडलमालिख्य तिलाक्षपुष्पाज्यमंड

प॰
१०४

104

लानेकीकृत्य तत्र संस्थाप्य ॐ ऐं ह्रीं श्रीं मूलं दक्षिणायै कालि
कायै स्वाहा पशुबलिः नमश्चमत्स्यजपनेनसंध्यायेत् ततः
स्वर्णादिपात्रे सिंदूरादिनाष्टदलं विधाय तत्र मध्ये दलाष्टके
च यवपिष्टादिरचितानि नवदीपपात्राणि संस्थाप्य घृतेनाष्ट
ये कर्पूरादिवर्तिकानि निक्षिप्य भुवनेश्वर्या प्रज्वाल्य श्रीं ह्रीं
ग्लूं स्लूं म्लूं प्लूं न्लूं स्त्रीं ह्रीं इति नवरत्नेश्वरीविद्ययाविरभिमं

श्चक्रमुद्रांप्रदर्श्यपरत्नेश्वरीतियांपुनरुच्चार्यपरत्नेश्वरी
श्रीपा॰ इतिसंपूज्य मूलेनमूलदेवीमारात्रिकायांसंपू
ज्य पात्रमामस्तकमुद्धृत्योत्थायघंटावादनपूर्वंदेव्याम
स्तकादिपादांतंमूलंसमस्तचक्रचक्रेशीयुतेदेविपरात्रि
के आरात्रिकमिदंदेविगृहाणममसिद्धये इतिपठन्दे
व्यामस्तकोपरित्रिस्त्रिभ्रामणपूर्वंनवकृत्वोनीराजये

प॰
१०५
105

दिति सामान्यारात्रिकविधिः अथ विशेषारात्रिका तत्र स्व
र्णादिपात्रे ॐ क्रमाद्दिना नवयोनिचक्रं विलिख्य लोहवर्जं क
त्पिपात्रे सूपमतिशुभ्रौदनं नवधा विभज्य नवगोलकानि
कृत्वा भाग गोलकान् सप्तसप्तदीपाधारयोग्यानि हस्ताका
राणि नवराजिनानि कृत्वा कचित्संस्थाप्य शर्करा घृत गो
धूमचूर्णानि पिंड ग्रसम ग्रमेन परस्परं पार्श्वे संलग्नं संलग्नस

त्रसप्तकान्नववृत्तगणान्कृत्वा तस्मिन्नवयोनिचक्रे म
ध्यानिनवयोनिषु संख्याप्यहृतपाचिताः चणकाद्यपादि
मुद्रान्विकीर्य तत्र शर्करामिश्रितानि नवयववगोधूममु
ख्यादिरचितानि सुहितश्रसितपिष्टकानि चतुरंगुलोन्नता
नि प्रभिमतानि वारिकोणोंकारसुखोनि उमर्वाकारा
णि वा कृतपाचितानि दीपपात्राणि कृत्वा तेषां नववभाज

प०
१०९

106

नानाशुपरिपकैकस्मिन्समसमसमघ्याग्रयेन् ततस्तामिस्तगं।
धिगोस्तृतसुर्णानिकृत्वा प्रागवद्धानिनिक्षिप्य देव्याः प्रसाद
स्तैवासंस्थाप्य तत्रगोमेदस्वर्णमरकतपद्मरागनीला।
नि गगनादिकानांपंचरत्नानिनिक्षिप्य भावयित्वावाम
लेनभुवनेश्वर्यावाहीपान् प्रज्वाल्यचक्रशुद्धांप्रदर्श्य गलंग
गनलोकगोमेदरत्नायगलेनमः स्तेस्वर्गलोकस्वर्णरत्ना

यस्लं नमः स्लं मर्त्यलोकमरकतरत्नाय स्लं नमः स्लं पाता
ललोकपद्मरागरत्नाय स्लं नमः स्लं नागलोकनीलरत्ना
य स्लं नमः इति स्वाग्रादिमध्यान्तं प्रादक्षिण्येन संपूज्य भगवद्
न्तेश्वरीमभिमन्त्र्य संपूज्य सपुत्याघघंटावादनपूर्वं भगवन्ती
राजयेत् ततस्तस्याग्रे तन्मंडले निधाय दीपमालामथमहः
पपपत्वादिस्तेजः सवितेव विवस्वतः संविद्रूपेणास्थिनेति

प. १८

(107)

प्रायेदिति विशेषात्रिकाशक्तौ प्रत्यहमशक्तौ पर्वसु कुर्यात्
इति विशेषाराधिका अथ कुमारीं सुवासिनीं वा देवताबुद्ध्या
देवीप्रीतये पूजयेत् सर्वलक्षणसंपूर्णां सुस्नातां सुपरिष्कृ
तां कन्यां सुवासिनीं वा समानीय तत्पादौ प्रक्षाल्य संमार्ज्य
पूजापीठे समुपवेश्य तस्याः पादौ पादपीठोपरि सुपादपीठे
स्थिरासने संस्थापनो योगपीठपूजां विधाय स्वस्तिकासनो

पविष्टायांतस्यां ॐमंत्रात्मकमयीं लक्ष्मीमातृकारूपधारि
णीं नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं इत्यावाह्य
ऐं क्लीं सौः श्रीबालात्रिपुरायै नमः कुमारीश्री पा० पू० इति
तस्या दोर्भ्यां संपूज्य बालाविधयैव गंधादिदीपांतैरुपचारैः
संपूज्य सुवासिन्यांतस्सुवासिनीश्रीपा० इति संपूज्य तत
स्त्रिवृंदं समभ्यर्च्य वाहनविप्रपापनस्यां मूलेनावाहनादिप

प
९८

108

रणोकरणां तं विधाय मूलदेवीं पूजितां ध्यायन्मोदिवकुम्
डवराभयादि सहाम्बुपटदर्पं मूलेन पुष्पांजलिभिः संपूज्य
प्रागवदासनादिभोजनांतान्नुपचारांस्तत्र चर्ये आचमनीयं
दत्वा तां बूलं वस्त्रादिदक्षिणां च समर्प्य प्रणम्य विसर्जये
दिति कुमारीपूजनं ततो भोगपात्रं निवेदनपदे पूर्वोक
रीत्या पूजितायै कुमारिकायै स्वतस्मिन्ने वा शाक्तिपात्रं नि

वेद्यभोगपात्रस्य चर्वणसहितं भोजनादिकं दत्वा विसर्जयेदि
ति ततः स्वगुरुं श्रीगुरुपादुकां विधया समभ्यर्च्य तदीयं
पात्रं तस्मै निवेदयेत् तदभावे तत्कल्पाय तदभावेऽपि स्वशि
रः पद्मस्याय गुरवे वेद्यत्रिः सेतर्प्य तत्प्रसादं स्वात्मनि योजये
त् ततो वटुकमंत्रेण कुमारं संपूज्य स्वं स्थापितवटुक
पात्रं तस्मै कुमाराय निवेदयेत् ततः स्वपात्रं ह्रीं हंसः

पं० सोऽहं स्वाहा आत्मनेनमः इत्यात्मा द्वान्तरमंत्रेणास्वात्मनियो
१०९ जयेत् ततोभोगपात्रसमर्पणविधिः ततोमूलेनमूलदेवी
109 पुष्पांजलिंविधायप्राणायामसष्यादिकरषडंगन्यासान्विधा
यस्वात्मानंकामकलारूपंविभावयनस्वशिरसि अआपक
चटतपयशषक्षणशक्तिश्री० ईपेपवछबढयफरतश्री
अग्नियाक्तिश्री० लेलषउ भन्नणानमसहशक्तिशक्तिश्री०

इति संपूज्य ॐ ह्रीं हंसः सोऽहं स्वाहा ह्यात्मने नमः इति स्वा
त्मानं शिरसि पूजयेत् मालामादाय पात्रे वामकरे वा निधा
य मूलेन स्नामामन्त्रौदकेनाभ्युक्ष्य ॐ मां माले महामाये
सर्वशक्तिस्वरूपिणि चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धि
दा भव ॐ सिद्ध्यै नमः इति गंधादिना संपूज्य गं अविघ्नं कु
रु माले त्वमिति च करे मालां गृहीत्वा स्वशिरसि स्वगुरुं

प॰
११॰
110

कंठेपीतवर्णांविद्यांहृदयेश्रीपरदेवतांश्रीगुरुचरणयोः
स्वात्मानंध्यात्वा भ्रूमध्येतेषांचत्रयाणामैक्यंविभाव्य विष्णु
हैचन्द्रसूर्यमेकीकृत्यमालीयश्रीपरदेवतारूपत्वेनध्यात्वा
यथाविधिजपंसमाप्य त्वंमालेसर्वदेवानांप्रीतिदाशुभ
दाभव शुभंकुरुष्वमेभद्रेयशोवीर्यंचसर्वदा इतिमालांस्व
शिरसिसंस्थाप्य पुनरपिकुष्ठादिकरोगव्यासान्विधाय

ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु
मे देवि त्वत्प्रसादान्महापापिस्थिता इति सामान्यामृतेन देव्या वा
महस्ते तेजोमयं जपफलं समर्प्य मालां संपूज्य २२ः स्थाप
येत् ततो मूलेन देव्यै पुष्पांजलिं दत्वा चेटावादन एतं देवी
स्तोत्रं पठेत् श्रीमत्क्लीकोशाह्वदेवे पंचसिंहासनात्मके
फलं कल्पलतानां च वारुरत्नस्फारत्कं चक्रराजतनां

५०

दिव्यमरन्वयकोशगम् निर्वाणदं परंब्रह्मधामनौमिसह्या
मये गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीं प्रणमामिम
हादेवीं मातृकां परमेश्वरीं कालाहलहलोहोहंकलनाश
मकारिणीं यदक्षरैकमात्रेणसंसिद्धः स्पर्धते नरः रविता
र्क्ष्यंडकंदर्पशंकरानलविष्णुभिः यदक्षरशशिज्योत्स्नाम
ण्डितं भुवनत्रयं वंदे सर्वेश्वरीं देवीं मातृकां सिद्धमातृकां य

दत्तामहास्त्रेप्रोतमेतज्जगत्त्रयं ब्रह्मांडादिकटाहांतंतांवं
देसिद्धमातृकां यदेकादशमाधारंवीजंकोणत्रयोद्भवं ब्र
ह्मांडादिकटाहांतंजगदद्यापिदृश्यते अकचादिटतोन्नद
पयशाक्षरवर्गिणीं ज्येष्ठांगबाहुहृत्पृष्ठकटिपादनिवा
सिनीं तानीकाक्षरोद्धारांसारात्सारांपरात्परां प्रणमामि
महादेवींपरमानंदरूपिणीं अद्यापियस्याजानंतिनमनाग

पं. ११२

पिदेवता: केयंकस्मात्केनेतिसद्रूपारूपभावना वंदेता
मद्रमतत्यमतकारात्तरहूपिणी देवीऊलङ्ऊलोहोलम्रोह्ला।
मंत्रीपरांशिवां वर्गानुक्रमयोगेनयास्यांमात्राष्टकांस्थितं
वंदेतामष्टवर्गोत्थमहासिद्ध्यष्टकेश्वरीं कामरूपंजकारा।
ख्यः श्रीपीठांतनिवासिनी चतुराज्ञाकोशभूतांनौमिश्रीका
लिकामहं एवंद्वादशभिः श्लोकैः स्तवनंसर्वसिद्धिकृत दे

112

व्यास्त्वंउकृपायाः स्तवनंतावनयतः इतिस्तुत्वापुष्पांजलि
मादायग्रमैश्चस्तवैः स्तुत्वादेव्याश्चरणयोः क्षिपेत् ततः प्रा
र्थनमुद्रांबद्ध्वाप्रार्थनस्तवंपठेत् । किंकिंदुःखंदनुजदल
निक्षीयतेनस्मृतायांकाकाकीर्तिः कुलकमलिनिव्याप्यते
नस्तुतायां काकासिद्धिः सुरवरनुतेप्राप्यतेनार्चितायांकंकं
योगंत्वयिनविहितेचित्तमालंबितायां सर्गासंसर्गसंरंभस्फा

प०
११३

113

रिताघौघविभ्रमे चिच्चंद्रमंडलांतःस्थे नमस्ते हरवल्लभे ज
गदाह्लादनोद्योतयोगभोगावियोगिनि स्थितिभावास्थि
ते गौरि नमः स्थाणुप्रियेंबिके भवभावाप्ययाभावस्वध
र्मोदयरूपिणि चैतन्यपंचके देवि नमस्तेऽस्तु हरांगने स
ष्टिस्थित्युपसंहारप्रसरत्तपनोदये चिद्विश्रांतमहासत्तामा
त्रे मात्रे नमोस्तु ते वह्न्यर्कशीतांशुकिरणाव्रातचक्रांतरोदिते च

तुष्टीदेश्वरीदेविनमोदक्षिणकालिके चराचरमिदंविश्वं
प्रकाशयसिमास्यच मातृकारूपमास्थायतस्यैमातर्नमो
स्तुते स्मृत्वाभवभयंहंसिरतिनासिशुभंकरी स्तनात्वंवांछि
तंवस्तुददासिकरुणाकरे भक्तस्यमेनित्यरज्ञाशुक्लस्यपर
मेश्वरि वाग्भवादिमहासिद्धिंदेहिदक्षिणकालिके परमा
नंदसंदोहप्रमोदभरनिर्भरे दुःखत्रयपरिम्लानवदनेषा

पं°
११४
114

ह्रिमांशिवे शङ्खचक्रमये स्वच्छे देवि दन्तिगण कालिके यथा
शक्तिजपं प्रजां गृहाणामदत्तु गृहात इव्यहीनं क्रियाहीनं म
न्त्रहीनं च यद्भवेत् सर्वं तत्कृपया देवि क्षमस्व परमेश्वरि य
न्मया क्रियते कर्म जाग्रत्स्वप्नसुषुप्तिषु तत्सर्वं तावकी पू
जा भूयाद्भूत्यै नमः शिवे यन्मयोक्तमिहाज्ञानान्नन्म ह त्वस्य
मेवत्र हं न सर्वं जगत्कारिणं तत्क्षमस्व मम अञ्जलिः है ना है न महा

मोहशार्वरीक्षपणक्षमः भास्वानिव जयत्येको गणेशः शा
क्तिसंयुतः प्रतिभासागरोल्लासो निशाकर इवापरः मू
र्तिभक्तः स जयति वटुकस्तोडवान्वितः षट्त्रिंशत्तत्त्वम
रितं देवेशं यः पालयत्यलं देवेशं तमहं नौमि वारुणमेवं
महाबलं चतुष्पीठनिवासिन्यो योगीश्वर्यो महाबलाः
चतुःषष्टिप्रकारास्ता नित्यं वन्दे कुलागताः भेदाभेदमहा

मोदविवर्त्तपरिमंडितं आश्रयंतीं समयां ह्यां विशाणांन
मामपह्ने इतिस्तुत्वा पुष्पांजलिं कृत्वा श्रीगुरुस्तोत्रेणापि गु
रुं स्तुत्वा प्रणम्य सर्वशाक्तिक्रमोज्झितिप्रभृम्नो हमिहात्मि
कां देवस्य देवतां कांचित्संवित्स्वमयीं श्रये इत्युच्चरन्न
मस्कारमुद्राप्रदर्शनप्रदक्षिणानि कृत्वा ॐ सर्वमंगलमंग
ल्ये शिवे सर्वार्थसाधके शरण्ये त्र्यंबके गौरि नारायणि न

मोस्तते इति श्लोकं समग्रं पठित्वा साष्टांगं पंचवारं प्रणाम
यं वितनु स्वस्तिकमठ श्रेष्ठियो व्याख्याभिः पंचमुद्राभिः प्रण
मेत् ततः साष्टांगं प्रणाम्य भूमौ स्खलितपादानां भूमिरेवा
वलंबनं त्वयि जातापराधानां त्वमेव शरणं शिवे अपराधो
भवत्येव सेवकस्य पदे पदे कोपरः सहते लोके केवलं स्वामि
नं विना अपराधसहस्राणि क्रियंतेहर्निशं मया समस्तं म

घ॰
११६

116

विधंसर्वमितिमातः त्वमस्यमे इतिवद्धा्घण्यात्सिद्धकं
त्वमाप्य अर्घ्योदकचुलकेनपात्रांतरेणचादाय धे ततःस
वैशाणुद्विदेहधर्मोधिकारतोजाग्रत्स्वप्नसुषुप्त्यवस्थासु
मनसावाचाकर्मणापद्भ्यामुदरेणशिश्नायत्स्मृतंयदुक्तंतत्स
र्वंगुरुदेवतासमर्पितमस्तुस्वाहा मांमदीयंचसकलंश्रीमहा
कालिकायैसमर्पयामि ॐतत्सदित्यनेनदेव्याश्चरणारविंद

योऽर्घहीनोदकदानेनात्मानं समर्प्य केवलपुष्पेणमूले
न मूलदेवीसमधाम्नेऽपूज्य कृतांजलिः यद्दत्तं भक्तिमात्रेण
पुष्पं पत्रं फलं जलं निवेदितं च नैवेद्यं तद्गृहाणानुकंपया
आवाहनं न जानामि न जानामि विसर्जनं पूजाभागं न जा
नामि त्वं गतिः परमेश्वरि कर्मणामनसावाचावानास्तिवा
न्या गतिर्मम अंतश्चारेण भूतानां रक्ष त्वं परमेश्वरि मात

पा॰ १८

योनिसहस्रेषुयेषुयेषुव्रजाम्यहं तेषुतेष्वच्युतामक्ति
रच्युतेस्तुसदात्वयि देवीदासीचभोक्तीचदेवीसर्वमिदंज
गत् देवीजयतिसर्वत्रयादेवीसाहमेवहि यदक्षरपदभ्र
ष्टंमात्राहीनंचयद्भवेत् तत्सर्वंक्षम्यतांदेवेशिकस्यनस्खलि
तेमनः नमस्तेदेवेशिकालिकेपरमेश्वरि तवपादांबुजे
नित्यंनिश्चलाभक्तिरस्तुमे इतिसर्वंक्षमाप्ययोनिमुद्रया

११८

प्रणम्य शंखमुद्धृत्य देव्याः परिभ्रामयित्वा साधुवा साधु
वा कर्म यद्यदाचरितं मया तत्सर्वं कृपया देवि गृहाणारा
धनं कुरु इति देव्या दत्तहस्ते शंखजलं किंचिद्दत्वा शंखं च
यथास्थाने निवेश्य तज्जलं किंचिद्वामहस्ते निधाय मूल
मन्त्रेण सप्तवारमभिमंत्र्य तेन जलेनात्मानमभ्युक्ष्य अमा
नपि सामयिकान् शंखजलेन प्रोक्ष्य ततः पुष्पांजलिमा

प॰ ११८

118

दाय ॐरश्मिरूपामहादेव्याश्चक्रस्थितदेवताः महादे
व्यंगलीनास्ताः सततंसर्वे शुभावहाः इतिपुष्पांजलिं दिव्या
परिवारगणान्गणेशाद्यानंगदेवताहारदेवतासहिता
न्मूलदेवीदेहेविलीनान्विभाव्य कामकलारूपमात्मानं
ध्यात्वादेवीश्चबाणरूपमायुधंसर्वंनिजदेहेविचिंत्य देवी
रूपमात्मानंध्यायन्खेचरीमुद्रांबद्ध्वातेनहीजनदेवींप्रणम्य

मूलेविद्यांतेभगवतिश्रीमहाकालिकेत्वमस्वेतितालत्र
येणदेवीश्चोद्यतेजोमयींविचिंत्य गछगछपरंस्थानं
स्वस्थानेपरमेस्थाने यत्रब्रह्मादयोदेवानविदुःपरमंपदं
श्मशाद्यंतेजोरूपांतांसंहारमुद्रयानिर्माल्यभक्षेणतत्ते।
जः संगृह्यघ्राणपूरकयोगेनशिरःस्थसहस्रदलकम
लेशापय्य तत्रतत्क्षणंतेजोरूपंध्यात्वासंमन्त्रावर्त्मना ॐ

प॰ ११९

119

क्रों हृदयाय नमः इति हृदयकमले मा लीयतं त्रयं यथोक्तरूपां
देवीं ध्यायन् तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्वरि यत्र ब्र-
ह्मादयः सर्वे सुरास्तिष्ठन्ति मे हृदि इति हृदयकमले संस्थापयि-
त्वा तत्त्रयं यथोक्तसिंहासनमध्यगतं श्रीचक्रमध्यगतां सपरि-
वारां परदेवतां मूलाधारे संस्थापयेत् तत्र शाम्भां जलेन त्रि-
कोणवृत्तचतुरस्रमंडलं निर्माय तन्मध्ये उद्धिष्टचं ऊलिनीनि

मौल्यमालिनीं तन्मंत्रेणाषडंगन्यासविधिना सकलीकृत्य
तां ध्यायेत् मातंगीं नवयावकार्द्रचरणां श्रोल्लासिकृपाणां
शुकां वीणोल्लासिकरां समुन्नतकुचां शुक्लांशवालाव।
लीं हृद्यांगीं स्मितशोभवक्त्रोज्ज्वलपरांविंबाधरां सस्मितामाक
लौं लकवेणिमञ्जनयनो ध्यायेच्छुकश्यामलां इति ध्या
त्वा देवीं निर्माल्येन ऐं नम उच्छिष्टचेंडालिमातंगिनिस

प·
१२·
120

वैवशंकरि स्वाहा इति निर्माल्यपुष्पैरस्त्रैः संपूज्य ततस्त्रि
मोस्योदकादिभिः पाद्यादिदीपान्ताउपचर्य नैवेद्यस्य शान्ता
शं सहस्रांशं वा तच्चरणोदकेन सहस्रमादाय ततो निर्माल्य
पुष्पांजलिमादाय लेह्यचोष्यान्नपानादितां मूलं स्वाविले
पनं निर्माल्यभोजनं तुभ्यं ददामि श्रीशिवाज्ञया इत्यनेन
पुष्पांजलिं दत्वा तालत्रयमूर्ध्वकं शरणीपरम देवनाथगुरोस्ता

मिन्नैरेशिकस्वात्मनायक श्राद्दिशादिक्कुपादिसंयोगज्ञां एत्री
तरांकुरु इतिश्रीगुरुं प्रार्थ्य श्रीपादुमामस्तकगुरुंस्वशि
रः संस्थिताय श्रीगुरवे समर्प्य तत्पाद्ये दक्षिणकरेण निधाय ध्यं
श्रीगुरुपादुकाविश्रांते श्रीसहजानंदकैलानंदनाय श्रीपादु
कांतर्पयामि नमः इतित्रिः संतर्प्य तत्पादुं यथास्थाने नि
वेशयतज्जलं किंचित्पात्रांतरे निधाय ध्यं प्रथमत्वं उमात्मत

प॰
१२।

त्वाय नमः द्वितीयवेदं उं विद्यातत्त्वाय नमः तृतीयवेदं उं शि
वतत्त्वाय नमः समस्तविद्यामुच्चार्य सर्वतत्त्वाय नमः इ
ति तस्मिन् जले तत्वत्रयं विन्यस्य तज्जलं पुनः पात्रां
तरेणांगुष्ठतुलकेनादाय त्रैलोक्यं निक्षिप्य ध प्रकृति
बुध्यहंकारमनः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपा
युपस्थशब्दस्पर्शरूपरसगंधाकाशवाय्वग्निसलिलपृथि

थात्मकशुद्धचतुर्विंशतितत्त्वसहितं ग्रंथ्यांइति प्रथमखंडं
आत्मतत्त्वात्मकस्थूलदेहं शोधयामि स्वाहा मायाकलावि
द्यारागकालनियतिपुरुषात्मकशुद्धाशुद्धसप्ततत्त्वसहितं
कं खं २५ द्वितीयखंडं विद्यातत्त्वात्मकं सूक्ष्मदेहं शोधयामि
स्वाहा शिवशक्तिसदाशिवेश्वरशुद्धविद्यात्मकपंचशुद्धत
त्त्वसहितं ५ तृतीयखंडं शिवतत्त्वात्मकं परदेहं शोधयामि

प॰
१२२

122

स्वाहा शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्या
रागकालनियतिपुरुषप्रकृतिबुद्ध्यहंकारमनःश्रोत्रत्वक्
चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरस
गंधाकाशवाय्वग्निसलिलपृथ्व्यात्मकशुद्धसिद्धाषड्विं
शतत्वसहितंममसमस्तमूलप्रत्यार्थे सर्वतत्वस्थूलसूक्ष्मपरा
त्मदेहरूपाभिमानिनंजीवात्मानंशोधयामिस्वाहा इति

श्रुतकवचतत्पूर्यं स्त्रीकृत्यतन्मात्रं कराभ्यामादाय मूल
विद्यां पादुकाविद्यां चोच्चार्य प्रकाशाकाशहस्ताभ्याम
वलंब्योन्मनीस्रुचं धर्माधर्मकलास्नेहपूर्णां वह्नौ जुहो
म्यहं इत्युच्चार्य तज्जलमश्नीयात् ततः कराभ्यां मूर्धादि
पादांतं एवौक्षषड्त्रिंशत्तत्त्वात्मकतां भावयन्स्वदेहं स्पृशे
त. अथैनावल्कतमशकौसंध्याप्रकरणोक्ताचमनवि

प
१२३

पिनातत्वचतुष्टयं शोधयेत् । अथ सामयिकैः सह पानादि
कं कुर्यात् यथा चक्राकारेण पंक्त्याकारेण वा एष्य करव
गासनेषूपविष्टैः साधकैः सह शक्तिसंयुक्तः स्वेन गुरुक्र
मेण पद्मासनेनोपविश्य सामयिकललाटे चंदनाक्षतं शि
वशक्तियुग्मपूजां दत्वा । ततो यदि गुरुस्तत्र स्थितो भवेत्त
दा तत्कृतं गंधपुष्पादिना संपूज्य तस्याज्ञां गृहीत्वा सहितं त

123

स्यै समर्प्य प्रणमेत् गुरोरभावे तत्पात्रं जले निक्षिपेत् ततः
शक्तिपात्रं ग्रह्यादिसहितं तस्यै दत्वा सामयिकेभ्योपि ज्ये
ष्ठानुक्रमेण वीरपात्रास्वरामृतं शुद्धिसहितं पात्रे प्रदत्वा
ततः स्वयं साधकोपि भक्त्या हस्तद्वयेन पात्रं संगृह्य तदुप
रि मूलमंत्रं विधाय ज्ञात्वा एवं वदानंदभैरवभैरव्यौ संतर्प्य गु
रुदेवताश्चतर्पयेत ततः स्वस्वसंकल्पोक्तविधिनातत्त्व

प॰
१२५

124

शुद्धिंकुर्यात् ततस्तैः सद्भाववदनंकुर्यात् यथा इदंपवित्रमम
तंपिबामिभवभेषजं पशुपाशसमुच्छेदकारणंभैरवोदितं
विमेषान्तेऽसारत्वात्तस्यानंदमयत्वतः तन्मयत्वाच्चभावा
नांभावाभ्यंतरितात्मके स्वस्थानेऽप्यविकासायास्वारसः स्वेन
पीयते तस्मादिमांसुरांदेवींसर्वाणांहृत्तांजुहोम्यहं श्रीमद्भैर
वशेखरभवितसच्चेहामृतप्लावितंतेजाधीश्वरयोगिनीजनग

णौः सिद्धैः समाराधिते ॐ अहं ज्वलतिज्योतिरहं अस्मि ज्यो
तिर्ज्वलति ब्रह्माहमस्मि अहमस्मि ब्रह्माहमस्मि अहमस्मि
ब्रह्माहमस्मि योहमस्मि ब्रह्माहमस्मि अहमेवाहं मां जुहो
मि स्वाहा आनंदार्णवकं परात्मकमिदं साक्षात्त्रिवेदामृतं
वंदे श्रीअघमर्षणं करांबुजगतं पात्रं विशुद्धिप्रदं । इत्यभिवंद्य
वामहस्तेन पात्रमुत्तोल्य वंदनं कृत्वा श्रीगुरुशक्तिसाधके

पु॰
१२५
125

भ्यो भात्तां शृङ्गीयानन्तेवज्रषास्वेतिश्रुः ततो मूलाधा
रात्कुंडलिनीमिष्टदेवतास्वरूपामाजिह्वांतं विभाव्य रु।
पाङ्कां स्मृत्वा शिवोऽहमिति विचिंत्य हस्ताभ्यां पात्रं धृत्वा मू
लमंत्रमुच्चरन्कुंडलिनीमुखे देवीं तर्पयेत् ततः कुसुमदया
करपद्मतो कृत्वा मंत्रतत्त्वं स्मरेत् गुरुपदं देवीं कलां चिन्मयी
मपश्यात्मा त्रिवर्षं पलास्ववहन्तदीपं पुनः कज्जलैः इष्यादिष

भिमंत्रितं च निविडं संमोहनं चासतां ये संविम्पपिवंति यां
तित्वलतेश्रक्लिंचमुक्लिंपरां तंगेतरो सिंहरतिलकं भाले
पाणौ च मदिरारसं हत्वा पिवेत्नुरूं ध्यायेत्तयादेवीं च चि
न्मयीं इतितत्वचपात्रमाधारे परिसंस्थाप्य उनलस्यैवक्क
मेणपरामृतं गृहीत्वा पात्रं वेदनेरूपींयथ्या ऐमं चैणारसा
वंहटयितयादत्तं च पेयादिभिः किंचित्रं वलरक्तपंकज॰

प. १२६

126

दृष्टान्तस्यैव समावेदितं वामेस्थातुत्तरं विशुद्धिकरणं पाणौ
निधाय स्वके वंदे पात्रमहं द्वितीयमध्यमानं देकसंवर्धनं
१ ततः पूर्ववत्पात्रे स्वीकृत्य पात्रमथ्यात्रवेदनं ऊर्ध्वाघ्या सर्वा
म्नायकलाकलापकलितं कौतूहलोद्योतनं चंद्रोपेंद्रम
हेंद्रशंभुवरुणब्रह्मादिभिः सेवितं ध्यातं देवगणैः परं मु
निगणैर्मोक्षार्थिभिः सर्वदा वंदे पात्रमहं तृतीयमध्यनावि

ज्ञानबोधक्षमं ३ मयंमीनरामावहंहरिहरब्रह्मादिभिः
सेविते शुद्धमैथुनधर्मकर्मनिरतंतारामन्त्रनिकाश्रिते
श्राचार्योहकसिद्धभैरवकुलाधीशेन संशोधितंपापात्मं
चमत्कारनतत्वसहितंपात्रंचतुर्थंनमः १ आधारेभुजगाधि
राजवलयेपात्रंमहीमंडलंमध्यंसप्तसमुद्रवारिपिशितंचा
सौचदिग्गंतित्तिनः सोहंभैरवमर्चयन्प्रतिदिनंतारागणैरत

पं०
१२६

नैराहिमख्खवैः सुरासुरगणैराज्ञाकरैः किंकरैः ५ इ
तिपंचमंपात्रं ततोयावद्दत्नादिकंनरलयतितावत्परं
कार्यंकर्तव्यं अथयज्ञमाणेयथा तदुक्तंरुद्रयामले साध
केभ्यश्चशक्तिभ्योदद्याद्भिर्मांसवंदनं साधकेंद्रैः समंऊ
र्ध्वोद्दीरणानादिभक्षणं अन्यत्रापि यावन्नचलतेदृष्टिर्याव
न्नचलतेमनः तावत्पानंप्रकर्तव्यंपशुपानमतःपरं अथो

127

नगान्तेये अज्ञात्वापुरतो लब्ध्वा गृह्णामीति स्वयं वदेत् न
यस्वेमम्य ज्ञातो गुरुणा वाऽकुलीनकैः गृह्णीयाच्च स्व
यं सिद्धः पिवेत्सर्वदा सुधीः कुलार्णवेपि एकासनोप
विष्टाये भुंजते चैकभाजने एकपात्रेपि वेदृश्यं ते यान्ति नर
के ध्रुवं एकपात्रे इति सर्वैर्मिलित्वैकपात्रेण पिवेत् इत्य
र्थः न तु प्रतिवारं द्रव्यपात्रेण तु पुनर्भिन्नं भिन्नं पात्रं कार्यं

प॰ १२८

128

अनुष्ठानात्र पपते: संशयायाविरहाश्च विना मंत्रेण याग
आविनामांसेन तर्पणं विना शक्त्या च यस्मात् नेतत्सर्वं निष्फ
लं स्मृतं स्वशक्तिं वीर शक्तिं वा दीक्षितां गुरुसमग्रणीः पाय
यित्वा पिवेद्द्रव्यमिति शास्त्रस्य निश्चयः नपद्यो वस्त्रशोभा
वेन विंदुं पातयेदथः शक्तिभक्तो वसेद्वापि उग्रमपुग्रमविपा
ननः शिवशक्ति पियासर्वं चक्रमध्ये विवर्णयेत् अत्रपा

नपरिमाणंयथातदुक्तंकालीकुलसर्वस्वे नपलार्द्धि
कंद्रव्यंपलेनामलकाधिकं पात्रेद्रव्यसमेकार्घेननवा
धिकमानतः तदुक्तंकुलामृतेपिनैकहस्तेनदातव्यंन
शुद्धावलिर्जितंपिबेत् नार्चयेदेकहस्तेननपिबेदेकपा
णिना शुभ्रोत्थंवेदनंकृत्वापिबेत्तदमृतंपुनः सव्येनोद्
त्यपात्रेणतुमुद्रांकृत्वापसव्यतः विनासंगेनयोगेननकुर्या

प०
१२९
129

हुरुसंगतिं साङ्गारं नोद्धरेत्पात्रं माधारेणावि निक्षिपेत् पादेन
चालयेत्स्थानात्तन्न कुर्यात्पात्रमेकरं सशाहं नापिबेद्धस्तेनैव
चनक्षालयेत् नस्थलेनैव सततं च कुर्यात्पात्रं मनोरमं उच्छिष्टो
नस्पृशेच्चक्रं कुलद्रव्याणि सुंदरि वहिः प्रक्षाल्य चक्रे कुलद्र
व्याणि दापयेत् निष्ठीवनमथोवाक्यं चक्रमध्ये विवर्जयेत् च
क्रमध्ये घटे भग्ने पात्रे च पतिते भवि हीपनाशे च शान्त्यर्थं श्रीच

क्रं कारयेत्सुधीः स्वपार्श्वस्थितदेहं च न दद्यादीश्वराय च
दत्ते च सिद्धिहानिः स्यात्क्रुद्धा भवन्ति योगिनी परिहासं प्र
लापं च वितण्डावहुभाषणं औदासीन्यं भयं क्रोधं चक्रमध्ये
विवर्जयेत् अन्योन्यमीरयेत्पात्रं न पात्रं पातयेद्बुधः गुरुश
क्तिसुतानां च गुरुज्येष्ठकनिष्ठयोः उच्छिष्टं भक्षयेत्स्त्रीणां
नान्योनोच्छिष्टमर्पयेत् चक्रमध्ये च नियतं नानायापनं

प
१२.

130

भवेत् कनिष्ठानांच शिष्याणां दद्याच्छोच्छिष्टमेव हि दद्यात्स्नेहेन
योग्येभ्यः सभवेद्दायदायदं अन्यत्रापि शास्त्रोच्छिष्टं पिबेत्सर्वं वी
रोच्छिष्टं तच्चर्वणं शक्तिवीरप्रसादेन किं न सिद्ध्यति सुन्दरि पी
त्वा पीत्वा पुनः पीत्वा यावत्पतति भूतले उत्थाय च पुनः पीत्वा
पुनर्जन्म न विद्यते अयं सामयिकाम्नायो शास्त्रं गुरूपदेशावि
धिना संप्रज्ञसंतर्प्यं च एवं वस्थापितवलिपात्रस्य मन्त्रादिक

मेकस्मिन्पात्रेकृत्वापूजागृहादुत्थायसोदकपात्रहस्तोबहिर्ग-
त्वा जलेनबहिर्गृहान्तरेशुचौदेशेचतुरश्रवृत्तत्रिकोणात्मकं
मंडलंकृत्वा तत्रकृष्णाभंभैरवंध्यायेत्सर्वविघ्ननिवारणं गदा
त्रिशूलडमरुपात्रहस्तंत्रिलोचनं इत्थंबटुकभैरवंध्यात्वागंधपु
ष्पाक्षतैः संपूज्य ऐंह्रींश्रींॐबटुकभैरवएहिएहिबलिंगृह्ण २
हूंफट्स्वाहा इतिपात्रस्थंबलिंदत्वातत्रमंडलेविसृज्य तस्मात्रे

प० १३१ 131

हस्तौपादौप्रक्षाल्याचम्यतस्मान्त्रजलेनार्घ्यं पूजागृहद्वारंग
त्वा उद्घाटयित्वातत्रैव ततः प्रविश्य स्वासने समुपविश्य तस्मा
त्स्यजलेविशेषार्घ्यपात्रजले बिंदुं दत्त्वा तज्जलं बिंदुभिः स्वात्मा
नमभिषिंचन् शांतिस्तोत्रं पठेत् नवश्रीवामकेश्वरतंत्रे नवपंच
शतकूष्मांडान शंपतदूषकानराः साधकानां शिवाः संतु स्वा
म्नायपरिपालिनां जयंतमातरः सर्वा जयंतु योगिनीगणाः

जयंतासिद्धडाकिन्योजयंतगुह्यपंक्तयः जयंतगुह्यसद्भावाज्ञ
येतगुरवः सदा जयंतसाधकाः सर्वेविशुद्धालौकिकाश्चये
जयंतिसमयाचारसंपन्नाः पूजकानराः नंदंत्वणिमिताः सि
द्धानंदंतिकुलपालकाः इंद्राद्यादेवताः सर्वास्तृप्यंतवास्तुदेव
ताः चंद्रसूर्यादयोदेवास्तृप्यंतममभक्तितः नंदंतत्वणिमा
सिद्धानंदंतभैरवादयः नंदंतदेवताः सर्वाः सिद्धविद्याधराद

प॰ १३२

132

यः येनाम्नायविशुद्धाश्रमं विप्राः शुद्धबुद्धयः सर्वदानंदहृदया
नंदंतु मम भक्तितः नक्षत्राणि ग्रहा योगाः करणा राशयश्च ये
सर्वे ते स्वाविनो यांतु मासाश्च तिथयस्तथा तृप्यंतु पितरः सर्वे
ऋतवो वत्सरादयः भूचराः खेचराश्चैव तृप्यंतु मम भक्तितः अं
तरिक्षचरा ये च ये चान्ये देवयोनयः सर्वे ते स्वाविनो यांतु सर्वा
नयश्च पतिणः पशवस्तरवश्चैव पर्वताः कंदरा गुहाः ऋष

ये ब्राह्मणाः सर्वे शान्तिं कुर्वन्तु मे सदा नीचा निषादा वो यावाये
वात्येषु प्राण्धर्मयः वृद्धः पतित्रमानवाः शिवं कुर्वन्तु मे सदा श्म
शानेरिव सः सेवन्तशिवान्ति एवं तु पूजकाः रतिवापारः येयेवा
पापिष्ठः सह्रद्धगाधिपोनेद्रा दद्राः पूजने देवाचारविसर्गे नष्ट
हृदयाश्च दुष्टाश्च ये साधकाः दृष्ट्वा चक्रमध्ये गात हृदया ये कौ
लिकाद्भुषकास्ते न यान्तु विनाशमत्र समये श्रीभैरवस्याज्ञया

प०
१३३

133

देशरः साधकानां च सदेवाम्नायहर्षकाः डाकिनीनां मुखे
यांतु सर्वास्ताम्निशितैस्तुताः शत्रवो नाशमायांतु मम निंदाक
राश्रये देशरः साधकानां च विनश्यंतु शिवा तथा येनिंदका
श्च नित्यं पश्यंतु ये साधकास्ते प्रभवंतु सिद्धाः सर्वत्र देवी करु
णावलोकापरः परोक्षी मम सन्निपन्नो इति शांतिस्तोत्रं पठित्वा
सर्वाम्नायिकान् विविंश्चाविशेषार्घ्यं पात्रमुद्रया शिरः स्थापयतु

रेवेशागवन्समर्च्य तैर्येवतन्मात्रकांतिः समभ्यर्च्य मूलविद्यांते
श्रीगुरुपादुकां विद्यांते च स्वाहान्तिस्समूलाधारोत्थापितः
ॐउल्लिस्यात्मकपादेवता ध्रुवेदृदव्यनबुध्यानतज्जलंपाद्यांतेरे
कृत्वा श्रीपात्र शेषं त्रिधा शिष्याय प्रस्मात्तद्वृत्त्याकिंचिद्द्यात्
सोपि स्वपात्रे कृत्वा तज्जलमश्रीपात्रस्य मध्ये प्रक्षिपेत् त
तः स्वगुरुपादिष्टविधिना शेषं कृत्यं निवर्त्य समापयेत् तत

पं·
१३४
134

स्नानादिपात्रे गंधपुष्पाक्षतं निवेद्य तज्जलं समापूर्य ॐ नमो विश्वरू
पाय विश्वात्मने विष्णुतेजसे नमः सर्वेश्वराय चैकस्मिन्विवेककर्मदा
यिने ॐ ह्रां ह्रीं सः सूर्यपार्षदेभ्यः स्वाहा इति सूर्यायार्घ्यं दत्वा हस्तां
जलिः ॐ यन्मया क्लिष्टं तत्पापं छिद्रं यच्छिद्रं पूजने मम सर्वं तदच्छिद्रम
स्तु भास्कर त्वत्प्रसादतः इत्यच्छिद्रमवधार्य मूलमंत्रं प्राणायाम
ऋष्यादिकरषडंगन्यासान्विधाय पाशुक्कगरुस्तोत्रं पठित्वा

श्रीगुरुं प्रणम्य मूलविद्याद्वितीयखण्डेन निर्माल्यं शिरसि धृत्वा
मूलेन विद्यया च चरणोदकं स्वीकृत्य श्रीपरमदेवताभक्तेभ्यो
नैवेद्यादिकं विभज्य दत्त्वा स्वयमपि सहृद्बान्धवजनैः साकं भु
क्त्वात्मानं कामकलारूपं विभावयन् सुखं विहरेदिति श्री
परदेवतानित्यपूजाविधिः उक्तं च कालीतन्त्रे विसृज्यपराया
भक्त्या सन्निधापनमुद्रया उद्वास्य हृदये देवीं तन्मयो भवति

पं·
१३५

135

ऽर्घ्यं भरथराणकालेन सजातैषाप्रकीर्तिता भैरवतंत्रेपि
हृदयेनववदेद्देवीं समर्घ्यंविधिवन्मनः निर्माल्यंवेष्णुचोद्देशे
नैवेद्यं भक्षयेन्मनः ततः सदामनोसिद्धिस्यभूमौमायाबीजेन
कनिष्ठांगुल्यातिलकंऊर्ध्वदेनेन येयेस्पृशतिपादेनयंयं
स्पृशतिचक्षुषा सएवदासतांयातिग्रहदेशाङ्कसमोभवेत् त
तोयंत्रलेयंत्रतलरंध्रेप्रत्वानैवेद्यंसर्वदेवायसाधकायवदन्ता

शोषंस्वीकृत्यः सोहमितिभावयन् वाल्लभोवैष्णवाचारपरा
यणोविः संगोपयात्मवृत्तिंविहरेत् इतितडकंऊलचूडाम
णौ बलरंध्रेऽष्टमेस्थानेयंत्रलेपंतुधारयेत् नालिकेभ्योन
पशुभ्योनमूर्तिभ्योनचाद्विजे ऊर्ध्वीनायायवदानक्रमसवा
जलमध्यतः ततः सोहमितिध्यात्वावैष्णवाचाररतःपरः
हरिनाम्नाजातभावोभवोत्थितविचेष्टितः चौरवद्विहरे

देकः सदासंगविवर्जितः यामनेपि च नैवेद्यं विभ्रादेव्यावा
द्वेतिविद्रुधाम्नये तस्मात्सर्वप्रदेव्याम्रणे वैष्णवेपि च सद्य
शक्राय सर्वाय गणेशाय यमाय च वरुण्ये वरुणायापि वा
यवे धनदाय च ईशानाय महादेविसाधकाय प्रदापयेत् तद्
विभवाप्तरूपलक्षणमिति अथ देवीविसर्जनानंतरं पानपट्टि
कं कार्यं तदलंकारालीव वीरमेकांतकामिनः अन्यथापि पा

नेत्रत्रिविधं प्रोक्तं दिव्यवीरपशुक्रमः दिव्यं देव्यग्रतः पानं वीरं
वीरासनेस्थिते तृतीयं तु पशोः पानं पापकृच्छोकमोहकृत
उदयाकरपद्मांच असंस्कृते व्ययापाने संस्कृते भैरवः स्वयं
चक्रपूजाविधौ शस्तं सर्वसिद्धिकरं शुभं असंस्कृते पशोः पा
नेकलहोद्वेगकारकं संस्कृते सिद्धिजनकं पापघ्नमादिपाप
ने मेषाणां स्फुरणं तेन महापातकनाशने आपुः श्रीकांति।

प॰ ११९

१३७

सौभाग्यज्ञाना: संस्तृतयानन्तः श्रीऐश्वर्ये विचारं तंयतनं वि
धिवर्जनात ॐ कंचदेवी रहस्यादि स्वपि विनाश्री विद्याद्देवि
साधकोटीस्तितः स्मृतः ग्रहीत्तितः पशुः प्रोक्तः पश्चात्नाद्विर
यी भवेत स्वजन्मनिशिवेतस्मात्कृत्यमभ्यर्च्यभक्तितः श्रीविद्यां
प्रार्थयित्वादेशूर्हणीयात्सर्वेसिद्धये महात्रिपुरसुंदर्याः श्रीवि
द्यां प्राप्य इलेभा मशिवां गिरिजेसांगोपार्धये दत्तिणां नतः वि

नाश्यामांनसिद्धिः स्यान्ममापिपरमेष्यति द्वाविंशत्यक्षरी
विद्यांप्रजपेत्साधकोनरः श्यामाविद्याजपेनाशुश्रीवि
द्यासिद्धिमेष्यति नामसौकालिकाप्रोक्ताराजसीषोडशा
क्षरी सात्विकीचपरादेवीमहाश्रीषोडशाक्षरी इति म
हामाहेश्वराचार्यवर्यहृदयातिविश्रुतैः श्रीमत्साहिबकौ
लाविस्थितिमद्भिः पराक्रमे श्रीमित्रानंदनाथायस्वात्मजा

यविनिर्मिता श्यामाख्याः पद्धतिस्तत्त्वा श्रीविद्यापद्धतिक्रमैः संपूर्णा पूर्णकामानां साधकानां मनोरमा सदानंदमहानंदनाथचिन्मयकाश्यपशः १४३ इति श्रीमहामाहेश्वराचार्यसाहिब्कौलानंदनाथनिबद्धा श्रीश्यामापद्धतिः संपूर्णेति शिवं ॥

ॐ अस्य श्रीकालीकवचस्य भैरवऋषिः अनुष्टुपछंदः श्रीदे
न रूपिणीकालिकादेवता लज्जाबीजं जगत्भवानीशक्तिः
क्रुंकीलकं सर्वार्थसिद्ध्यर्थेजपेविनियोगः ॐ सहस्रारे
महापद्मेकरमर्धवलोशरूः वामोरूस्थितिगः शक्तिः सर्वं
सर्वत्रतत्त पारमात्मेशरूः पातुपरापरशरूस्तथा पर
मेष्टीशरूः पातुदिव्योघः पातुमांसदा महादेवीमहापा

का॰
क॰
१

त्वामदेवस्तथैव च त्रिपुराभैरवी पातु दिक्षु रूपधरा सदा
ब्रह्मानंदः सदा पातु पूर्णानंदस्तथैव च चलचित्तः सदा पा-
तु मां वै पातु चलाचलः कुमारः क्रोधनश्चैव वरदः स्मरदी-
पनः मायामयवनी चैव सिद्धौघः पातु मां सदा विमलः कु-
शलश्चैव भीमसेनः सुधाकरः मीनो गोरक्षकश्चैव भोज-
देवः प्रजापतिः मूलदेवो रन्तिदेवो विघ्नेशश्च हुताशनः सं-

मोघः समरावेदः पातुमांमानवः सदा गणनाथः सद
पातुदुर्गामांपातिरक्षतु शिरसः पादपर्यंतंपातुमांचारद
क्षिणा अनिरुद्धाद्यघंवह्निः पातुकूर्चंहृदयंहृदि लज्जायुग्मं
सदाधारेरक्षिणाकालिकाहृदि प्रागल्भेदक्षिणेकूर्चंवा
मतोनर्गलाद्यं ह्रींवह्निवधूःपातुमूलेसर्वेश्वरक्षतु काली
कपालिनीकल्लाविश्वविमाह्निनीयके ३ग्राउ७ग्रभेदामातृनी।

का
क
२

2

यंपातुमांसदा नीलाघनाबलाकाव च चतुर्थ्यैवतुसर्वदा मात्रा
मुद्राभिमानाचैवपातुवान्यास्त्रिकोणगाः सर्वाश्यामाघ्रासिकरा
वामहस्तेनतर्जनाः आस्रीश्ववदत्तेपातुवक्त्रौमाहेश्वरीतथा
नारायणीतथाघाम्येचांमुंडानैर्ऋतेवतु एवांदिमांस्थितापा
तुहृदयेकालिकावतु ऊर्ध्वंमेकालिकापायादधस्तात्कालि
कावतु रितुमांकालिकापातुविदिक्षुकालिकावतु चर्मा

सृङ्मांसमेदोस्थिमज्जाशुक्राणिकालिका इंद्रियाणिमन
श्चैवदेहसंधिंचमेवतु आकाशात्पादपर्यंतंकालिकापा
तुमांसदा दिशंतुकालिकापातुपतनेमेपातुकालिका य
त्रमेसंशयात्विघ्नंस्तन्नाशयतुकालिका इतीदंकवचंदे
वित्रिषुलोकेषुदुर्लभं वारमेकंचयोध्यायामहापातक
नाशनं द्विवारंयःपठेन्नित्यंसततमूर्तिफलंलभेत् वारत्र

यंपठेद्यस्तुमहदैश्वर्यमाप्नुयात् इतिश्रीकालिकाकवचं
समाप्तं ॥

॥ श्रीगणेशायनमः भैरव्युवाच ॐकालीप्रज्ञाकला
नाथभगवन्विविधाप्रभो इदानींश्रोतुमिच्छामिकवचं
पूर्वसूचितं १ त्वमेवकारणंनाथज्ञाहिमांदुःखसंकटात्
सर्वदुःखप्रशमनंसर्वपापप्रणाशनं २ सर्वसिद्धिप्रदंभ
क्तकवचंपरमाद्भुतं त्वत्तोहंश्रोतुमिच्छामिवदमेकरुणा
निधे श्रीभैरवउवाच रहस्यंशृणुवक्ष्यामिभैरविप्राणव

का॰
स॰
१

ह्लभे श्रीजगन्मंगलंनामकवचंमंत्रविग्रहं ४ पठित्वाधा
रयित्वाचत्रैलोकंमोहयेत्क्षणात् नारायणोपियद्धृत्वानारी
भूत्वामहेश्वरं ५ योगेशंक्षोभमनयद्यद्धृत्वाचरघूद्वहः वरद
माजघानैवरावणादीन्निशाचरान् यस्यप्रसादादीशोपित्रै
लोक्यविजयीप्रभुः धनाधिपःकुबेरोपिसुरेशोभूच्छचीपतिः
७ एवंचसकलादेवाः सर्वसिद्धीश्वराःप्रिये श्रीजगन्मंग

तस्यास्य कवचस्य ऋषिः शिवः । छंदोनुष्टुप्देवता च का
लिका दक्षिणेरिता । जगतां मोहने दुष्टविजये भुक्तिमुक्ति
षु यो विद्राकर्षणे चैव विनियोगः प्रकीर्तितः । ओं शिरो मे
कालिका पातु क्रींकारैकाक्षरी परा । क्रीं क्रीं क्रीं मे ललाटं च का
लिका खड्गधारिणी । हूं हूं पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुती मम
दक्षिणे कालिका पातु घ्राणयुग्मं महेश्वरी । क्रीं क्रीं क्रीं रसनां

पातु हूं हूं पातु कपोलके सकलं वदनं पातु ह्रीं ह्रीं स्वाहा स्व
रूपिणी द्वाविंशत्यक्षरी स्कंधौ महाविद्या सुखप्रदा खड्गमुं
डधरा काली सर्वांगमभितोवतु क्रीं क्रीं हूं त्र्यक्षरी पातु चामुं
डा हृदयं मम ऐं हूं ऐं ऐं स्तनद्वंद्वं ह्रीं फट् स्वाहा ककुत्स्थले
अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका क्रीं क्रीं हूं हूं ह्रीं ह्रीं
पातु करौ षडक्षरी मम क्रीं नाभिं मध्यदेशं च दक्षिणे कालि

केवल क्रौं क्रीं स्वाहा पात्वोष्ठं च कालिका सा दशाक्षरी ह्रीं ह्रीं
दक्षिणे कालिके हूं हूं पातु कर्णद्वयं कालीदशाक्षरीविद्या
स्वाहान्ता चोरुयुग्मकं ॐ ह्रीं हूं स्वाहा मे पातु जानुनी कालि
कामदा कालीरूपामविद्येयं चतुर्वर्गफलप्रदा क्रीं हूं ह्रीं पा
तु सा गुल्फे दक्षिणे कालिके वल क्रीं हूं ह्रीं स्वाहा पदं पातु च
तुर्दशाक्षरी मम खड्गमुण्डधरा काली वरदाभयधारिणी वि

का॰
स्त॰
तु

3

याभिः सकलाभिः सा सर्वांगमभितो वर्त्त कालीकपालिनी
कुल्लाकुरुकुल्ला विरोधिनी विप्रचित्ता नद्योग्रा चोग्रप्रभा दीप्ता
घनान्विषः नीला घना बलाका च मात्रा मुद्रा मिता च सा एताः
सर्वाः खड्गकरा मुण्डमाला विभूषणाः इत्येतन्महाप्रयोहितत्वं
विदित्वा यथा न स्या इति नेकथितं हि ते कवचं परमाद्भुतं श्री
जगन्मंगलं नाम महामंत्रौघविग्रहं त्रैलोक्याकर्षणं ब्रह्मक

वचं मन्त्रबोदितं गुरुपूजां विधायाथ विधिवन्मपठेत्ततः क
वचेत्रिः सकृद्वापि यावज्ज्ञानं च वा नरः एतत्कृत्वार्धमावर्त्यै
लोक्याविजयी भवेत् त्रैलोक्यं तोभयन्त्येव कवचस्य प्रसादतः
महाकविर्भवेन्मासात्सर्वसिद्धीश्वरो भवेत् पुष्पांजलिं कालि
कायै मूलेनैव पठेत्सकृत् सतवर्षसहस्राणां पूजायाः फल
माप्नुयात् भूर्जे विलिखितं चैनत्स्वर्णस्थं धारयेद्यदि शिखा

का
मृं
४

यां दक्षिणे वाहौ कंठे वा धारणाद्बुधः त्रैलोक्यं मोहयेत्क्रोधा
त्त्रैलोक्यं चूर्णयेत्क्षणात् पुत्रवान्धनवान् श्रीमान्नानावि
द्यानिधिर्भवेत् ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रस्पर्शनात्ततः
नाशमायांति सर्वेषां कवचस्यास्य कीर्तनात् मृतवत्सा च या
नारी वंध्या वा मृतपुत्रिणी कंठे वा वामबाहौ वा कवचस्या
स्य धारणात् बहुपुत्रा जीववत्सा भवत्येव न संशयः नदेयं

परशिष्येभ्यो भक्तेभ्योपि विशेषतः शिष्येभ्यो भक्तियुक्ते
भ्यश्चान्यथा मृत्युमाप्नुयात् सर्वांगुह्यकमला वाग्देवी मेहि
रेणुके यो ज्ञात्वैतत्स्तवं मासमेकं यो निवसन्त्येव निश्चितं इदं कवच
मज्ञात्वा यो जपेत्कालिदक्षिणां सा तु लभते प्रज्ञामपि तस्य वि
द्या न सिद्ध्यति सशस्त्रघातमाप्नोति सोचिरान्मृत्युमाप्नुयात्
जपेदादौ जपेदंते सप्तवाराणि तत्क्रमात् नोद्धृत्यपरकृत्वा।

का॰
स॰
५

विगोपनीयं प्रयत्नतः लिखित्वा स्वर्णपात्रे वै एज्ञा कालेन सा
धकः मूर्ध्नि धार्यं प्रयत्नेन विधारत्नं प्रपूजयेत् इति श्रीरुद्रया
मले तंत्रे कालीकवचं समाप्तम् ॥

5

॥श्रीगणेशाय नमः ॐ नमो भवान्यै ॐ शिव उवाच ॐ क
पिलाय महाघोरः सर्वमंत्रेण नमो नमः धामासायमयापाशमसैस्थ
र्यपदस्थमनसे १ संपृष्टः परया भक्त्या यथोक्तविधिना भवान् कृ
त्वा मर्चने देव्यास्त्रैलोक्यविजिगीषया २ परशुरामोवाच श्रु
तन्तोयरिमिदेवपरमेशापुरातन रहस्यं परया देव्याः कृपया क
थय प्रभो ३ विनार्चनेन विना होमं विना न्यासं विना बलिं विना

म.
१

गंधं विनाशुक्ष्णं विना निन्मोदितं क्रियां ४ प्राणायामं विना ध्या
नं विना भूतविशोधनं विना जपं विना दानं यथा काली प्रसीद
ति ५ श्रीशिव उवाच शृणुत्वं योगमेकान्तं शृणु देवेश सर्वदं म
क्रानामतिमक्तोस्मि त्वमेव साधयिष्यसि देवीं दानवकोटिघ्नीं
लीलया रुधिरप्रियां सदा स्तोत्रप्रियां शुभ्रां कामकौतुकलाल
सां सर्वदानंदहृदयामासवामृतमानसां माध्वीकमत्स्यमां

सादिरागिनींवैष्णवींपरां श्मशानवासिनींप्रेतगणनृत्य
महोत्सवां योगप्रभांयोगिनीशांयोगीहृदयास्थितां ताग्र
ग्रकालिकांरामप्रसादेपिनमर्हम्मि तस्यास्तोत्रंमहापुण्यंस्व
यंकाल्याप्रकाशितं नवमत्कयायिष्यामिश्रुत्वावत्सावधा
रय गोपनीयंप्रयत्नेनपठितव्यंपरात्परं यस्यैककालपठ
नात्सर्वेविघ्नाःसमाकुलाः नश्यंतिदहनेदीप्तेपतंगाइव

स. सर्वज्ञः निशीथे मुक्तकेशस्तु नग्नः शक्तिसमन्वितः मनसा वि-
२ न्तयेत्कालीं महाकालेन लालितां पठेत्सहस्रनामाख्यं स्तोत्रं मो-
2 क्षस्य साधनं प्रसन्ना कालिका तस्य पुत्रत्वेनानुकंपते यथा ब्र-
ह्मामृतैर्ब्रह्मकुसुमैः पूजिता परा प्रसीदति तथानेन महाका-
ली प्रसीदति इति अस्य श्रीदक्षिणकालिकासहस्रनामस्तोत्रमंत्र-
स्य महाकालभैरव ऋषिः अनुष्टुप्छंदः श्मशानकालिक

देवता क्रींबीजं ह्रंशक्तिः क्रींकीलकं ममश्रीधर्मार्थकाम
मोक्षार्थे कालिकाभगवतीसंतोषणार्थेजपेपाठेविनियोगः
ॐनमोकालिकायै ॐश्मशानकालिका कालीभद्रकाली
कपालिनी गुह्यकालीमहाकालीकुरुकुल्लाविरोधिनी का
लिकाकालरात्रिश्चमहाकालनितंबिनी कालभैरवस्वाच
कुलधर्मप्रकाशिनी कामदाकामिनीकाम्याकमनीयस्वभा

स
३५

सिनी कस्तूरीरसलोलांगी कुंजरीसुरगामिनी ककारवर्णस
र्वांगी काकिनी काममंदरी कामान्ता कामरूपा च कामधेनुः रू
पावती कांता कालस्वरूपा च कामधेनुः रूपावती कांता
कालस्वरूपा च कामाख्या कामपालिनी कुलीना कुलवंद्या
दुर्गा दुर्गतिनाशिनी कौमारी कुलजा कृष्णा कृष्णदेहा कृशो
दरी कृशांगी कुशलांगी च क्रींकारी कमलालया कराला स्या

3

कमलीवकुलकांता पराजिता उग्राचोग्रतरादीप्ताविप्रचि
त्तामहाघना नीलाघनामेघनादामहामुद्रामितामिता
ब्राह्मीनारायणीभद्रासुभद्राभक्तवत्सला माहेश्वरीचचा
मुंडावाराहीनारसिंहिका वज्रांगीवज्रकंकालीन्नृमुंडा
स्त्राविनाशिवा मालिनीनरमुंडालीगलद्रक्तविभूषणा र
क्तचंदनसिक्तांगीसिंदूरारुणमस्तका घोररूपाघोरदं

स॰
४

ष्ट्रा घोराघोरतराशुभा महादंष्ट्रा महामाया सुदंष्ट्री युगदंतु
रा सुलोचना विरूपाक्षी विशालाक्षी त्रिलोचना शारदेंदुप्र
सन्नास्या स्फुरत्स्मेरांबुजेक्षणा अट्टहासप्रसन्नास्या स्मेर
वक्त्रा सुभाषिणी प्रसन्नपद्मवदना स्मितास्या प्रियभाषि
णी कोटराक्षी कुलश्रेष्ठा महती बहुभाषिणी सुमतिः कुम
तिश्चंडा चंडमुंडातिवेगिनी प्रचंडा चंडिका चंडी चर्चिका चंड

योगिनी सुकेशी ऊर्ध्वकेशी च दीर्घकेशी महाकचा प्रेतरे
ह्रकर्णीहरा प्रेतपाणि सुमेखला प्रेतासना प्रियप्रेता प्रेत
भूमिकृतालया श्मशानवासिनी पुण्या पुण्यदा कुलमं
डिता पुण्यालया पुण्यदेहा पुण्यश्लोका यशस्विनी पूता
पवित्रा परमा परा पुण्यविभूषणा पुण्यनाम्नी भीतिहरी
वरदा खड्गधारिणी नरमुंडहस्ता सच्छस्त्रा छिन्नमस्ता सुनासा

स
५

5

सिका दक्षिणा श्यामला श्यामा शोणा पीनोन्नतस्तनी हिं
वराघोररावा सक्रान्तारकवाहिनी घोररावा शिवासंगी
विसंगी मदनातुरा मत्ता प्रमत्ता प्रमदा सुधासिंधुनिवासि
नी अतिमत्ता महामत्ता सर्वाकर्षणकारिणी गीतप्रियावा
दिरता श्वेतनृत्यपरायणा चतुर्भुजा दशभुजा अष्टादशभु
जा तथा कात्यायनी जगन्माता जगती परमेश्वरी जगद्वंद्य

जगज्जाग्री जगदानंदकारिणी जगज्जीवमयी हैमवतीमा
यामहामही नागयज्ञोपवीतांगीनागिनीनागपाशिनी
नागकन्यादेवकन्यागांधारीकिन्नरेश्वरी मोहरात्रिर्महा
रात्रिर्दारुणाभास्वरेश्वरि विद्याधरीवसुमतीयक्षिणीयो
गिनीजरा राक्षसीडाकिनीवेदमयीवेदविभूषणा श्रु
तिः स्मृतिर्महाविद्यागुह्यविद्यापुरातनी चिंत्याचिंत्या

स॰
९

6

स्वधास्वाहानिशानंदाचपार्वती अपर्णानिष्कलालोलासर्ववि
द्यातपस्विनी गंगाकाशीशचीसीतासतीसत्यपरायणा नी
तिः सुनीतिः सुरुचिस्तुष्टिः पुष्टिर्धृतिः क्षमा वाणीबुद्धिर्म
हालक्ष्मीः लक्ष्मीनीलसरस्वती सरस्वती स्रोतस्वतीमातंगी
विजयाजया नदीसिंधुसर्वमयीताराशून्यनिवासिनी शुद्धा
तरंगिनीमेधाकाकिनीबहुरूपिणी स्थूलासूक्ष्मासूक्ष्मतराभ

गवत्यतुरूपिणी परमाणुस्वरूपा चचिदानंदस्वरूपिणी
सत्यानंदमयी सत्या सर्वानंदस्वरूपिणी स्वनंदानंदिनी स्त
व्या स्तवनीयस्वरूपिणी रंकिनी टंकिनी चित्रा विचित्रा चि
त्रभूषिणी पद्मा पद्मालया पद्ममुखी पद्मविभूषणा हाकि
नी शाकिनी शांता राकिनी रुधिरप्रिया भ्रांतिर्भवानी रुद्रा
णी मृडानी शत्रुमर्दिनी उपेंद्राणी महेशानी ज्योत्स्ना च

स.
८

चंद्ररूपिणी सूर्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पुमान्
शक्तिर्मुक्तिर्मतिर्माता भुक्तिर्मुक्तिः पतिव्रता सर्वेश्वरी सर्वमा
ता शर्वाणी हरवल्लभा सर्वज्ञा सिद्धिदा सिद्धा भव्या भाव्या भया
पहा कर्त्री हर्त्री पालयित्री शर्वरी तामसी दया तमिस्रा ता
मसी स्थाणुः स्थिरा धीरा तपस्विनी चार्वांगी चंचला लोल
जिह्वा चारुचरित्रिणी त्रपा त्रपावती लज्जा निर्लज्जा ह्री रजो

श्रुती सारस्वतीधर्मनिष्ठाश्रेष्ठानिष्ठुरनादिनी गिरिदुहंचर्म
ह्रीं विशिष्टाश्रेयसीवृष्णा भीमाभयानकाभीमानादिनीभीः
प्रभावती वागीश्वरीश्रीर्यमुनायज्ञकर्त्रीयजुःप्रिया ऋक्सा
माथर्वनिलयारागिनीशोभनःस्वरा कालकंठीकंबुकंठी
वेणुवीणापरायणा वंशिनीवैष्णवीस्वच्छाधात्रीजगदी
श्वरी मधुमतीकुंडलिनीऋद्धिःसिद्धिःशुचिस्मिता रंभोर्व

स्र
८

8

श्रीरनीरामारोहिणीरेवतीमता शंखिनीचक्रिणीकृष्णा
गदिनीपद्मिनीतथा शूलिनीपरिघास्त्राचपाशिनीशार्ङ्गपा
लिनी पिनाकधारिणीधूम्राशरभीवनमालिनी रथिनीसम
रेषेतावेगिनीरणपंडिता जटिनीवज्रिणीनीलालावण्याम्बुधि
चंद्रिका बलिप्रियासदापूज्यापूर्णादैत्येंद्रमर्दिनी महिषासु
रसंहर्त्रीवशिनीरक्तदंतिका रक्तपारुधिराक्तांगीरक्तखर्परह

स्तिनी रक्तप्रियामांसरुधिरासवासक्तमानसा गलत्कोटि
नमुंडाली मुंडमालाविभूषणा शिवासनाविनोनस्था महेशी
वृषवाहिनी व्याघ्रत्वंगवराचीनीचेलिनी सिंहवाहिनी वाम
देवी महादेवी गौरी सर्वसत्त्वभाविनी कालिकानरुणी हृदाहृद
मानाजवातरा स्वच्छविलासिनी ब्रह्मवादिनी ब्राह्मणी मही
स्वभावनी चित्रलेखालोपामुद्रा सुरेश्वरी प्रमोवारुदनीलीदणा

स॰
९

भोगवत्यनुरागिणी मंदाकिनी मंदहासा ज्वालामुखोद्भवां
तिका मानदा मानिनी मान्या माननीया मदोद्धता मदिरा मेदुरो॰
न्मादा सिद्ध्या सिद्धिप्रसादिनी सद्भावानंतगुणिनी सर्वलोका
नमोनमा जयराजित्वरा जैत्री जयश्रीजयशालिनी सुखदा।
शुभदा सत्या सभासंक्षोभकारिणी शिवदूती भूतिमती विभूतिर्भूष
णानना कौमारी कुलजा कुंती कुलस्त्री कुलपालिका कीर्तिः यश

स्विनी भूषा भव्या भूतपनिश्रिया सगुणा निर्गुणा दृष्टा निष्टाकाः
ष्टाप्रतिष्ठिता यनिष्टा धनदा धन्या वसुधा सुप्रकाशिनी उर्वीगु
र्वीगुरुः श्रेष्ठा सद्गुणा त्रिगुणात्मिका राजप्रज्ञा महाप्रज्ञा वद्गुणा
निर्गुणात्मिका महाकुलीना निष्कामा सकामा कामवर्षिनी का
मेश्वकलारामाभिरामा शिवनर्तकी चिंतामणि कल्पलताजा
ग्रती दिनवत्सला कार्तिकी कृत्तिका कृष्णा ग्रयोध्या विषमा स

स.
१०

10

मा समंत्रामंत्रिणी चूर्णा ह्लादिनी क्लेशनाशिनी त्रैलोक्यजननी
ज्येष्ठा निर्मांसा कालरूपिणी तडाकनिम्नजठरा शुष्कमांसास्थि
मालिनी अवंतीमथुराहृद्या त्रैलोक्यपावनेश्वरी व्यक्ताव्यक्तने
कमूर्तिः शारभी भीमनादिनी क्षेमंकरी शंकरी च सर्वसंमोहका
रिणी ऊर्ध्वतेजस्विनी क्लिन्ना महातेजस्विनी तथा अद्वैताभा
गिनी पूज्या सुरभी सर्वमंगला सर्वप्रियंकरी भोगधारिणी पिशि

तानना भयंकरीपापहरानिष्कलंकावशंकरी आशात्
छायाचेंदुकलातरुणावायुवेगिनी सहस्रसूर्यसंकाशाचं
द्रकोटिसमप्रभा वह्निमंडलमध्यस्थासर्वसत्वप्रतिष्ठिता
सर्वाचारवतीसर्वदेवकन्याधिदेवता इच्छाशक्त्याविभीभी
तिः सत्कीर्तिब्रह्मरूपिणी रंभोरुतचराकाराजयंतीवा।
रुणाऊरूः मनस्विनीदेवमातायशस्याब्रह्मचारिणी सि

स० ११

ह्रिसवुद्रिदाहूह्रिः सर्वाख्यासर्वदायिनी अगापहारिणीध्ये
यामूलाधारनिवासिनी आत्माऽव्यक्ताप्रसन्नमनाचेद्रनुव्योमकुं
लिनी वट्कोनिमन्वनाभिष्ठमस्यसंधारद्वव्रना आन्वीति।
कौटंउनीत्तिस्वयींशिविदसंदरी ज्वालिनी ज्वलिनी तालिनी
शैलतनयाविंध्यवासिनी अप्रमेयाखेचरीधेर्यातरीयाविमला
नरा अगस्त्याकारुणीच्छायावशिनीविस्फुलिंगिनी भुक्तिः

सिद्धिः सदाष्टाभिः प्राकाम्यामहिमाणिमा ईच्छासिद्धिर्वशि
त्वाचवईशत्वेत्तनिवासिनी लघिमाचैवगायत्रीसावित्रीभुव
नेश्वरी मनोहराचिंतादिव्यादेवदानमनोरमा पिंगलाक
पिलाजिह्वारसज्ञारसिकारसा सुषुम्णाऽयोगवतीगांधारी
नरकांतका पांचालीरुक्मिणीराधाराध्याभीमादिकारिका
अमृतातत्त्वसीहृंदाकैटभीकपटेश्वरी उग्रचंडेश्वरीवीरज

स॰ ननीवीरसुंदरी उग्रतारायशोदाख्यादेवकीदेवमानिता
१२ निरंजनाचिनादेवीक्रोधिनीकुलदीपिका कुलवागीश्वरी
12 ज्वालामातृकाद्राविणीद्रवा योगेश्वरीमहामारीभ्रामरीविं
दुरूपिणी दूतीप्राणेश्वरीगुप्ताबहुलाडामरीप्रभा कुब्जिका
ज्ञानिनीज्येष्ठाभुसंडीप्रकटाकृतिः द्राविणीगोपनीमाया
कामबीजेश्वरीक्रिया शाकंवरीकोकनदासुसत्यासत्यानिलो

नेमा अनसूयाविभ्रमाक्रूरासम्यक्शीलात्रिविक्रमा स्वस्ति
हृद्यमहाप्रीतिरूपाभूमावरांगना तापिनीतापिनीविश्वा
भोगदाभोगधारिणी त्रिखंडबोधिनीवश्याकमलाशब्दरूपि
णी बीजरूपामहामुद्रावशिनीयोगरूपिणी अनंगकुसुमाने
गमेखलानंगरूपिणी अनंगमदनानंगरेखानंगांकुशेश्वरी
अनंगमालिनीकामेश्वरीसर्वार्थसाधिका सर्वमंत्रमयीमो

स॰
१३

13

दिव्यरूपाणानंतरूपिणी वज्रेश्वरीवज्रमयीसर्वद्वंद्वक्षयंकरी
षडंगयुवतीयुक्तायुक्ताज्वालांशुमालिनी दुराशयादुराचारा
दुर्जयादुर्गरूपिणी दुरंतादुष्कृतिहरादुर्ध्येयादुरतिक्रमा हंसे
श्वरीत्रिकोणस्थाशाकंभर्यनुकंपिनी त्रिकोणनिलयानित्या
परमामृतरंजिता महाविद्येश्वरीश्वेताभीरुंडाकुलसुंदरी त्व
रिताभक्तिसंयुक्ताभक्तवश्यासनातनी भक्तानंदमयीभक्त

भाविनाभक्तशंकरी सर्वसौंदर्यनिलया सर्वसौभाग्यशालि
नी सर्वसंभोगभवना सर्वसौख्यनिरूपिणी कुमारीपूजनर
ताकुमारीव्रतचारिणी कुमारीभक्तसुखिनीकुमारीरूपधारि
णी कुमारीपूजकप्रेताकुमारीप्रीतिदाप्रिया कुमारीसेवका
संगाकुमारीसेवकप्रिया आनंदभैरवीबालाभैरवीवृद्धभैरवी
श्मशानभैरवीकालभैरवीपुरभैरवी महाभैरवपत्नीचपर

स॰
१४

मानंदभैरवी सदानंदभैरवी च उन्मदानंदभैरवी शुक्लानंद
भैरवी च तथा तरुणा भैरवी ज्ञानानंदभैरवी च ह्यमृतानंदभै
रवी तथा सकौलभैरवी ज्ञानानंदमभैरवी महाभयंकरी
नीलानीलवेगा नररक्षिनी त्रिपुरा परमेशानी सुंदरी पुरसुंदरी
त्रिपुरेशी पंचदशी पंचमी पुरवासिनी महासमादशी चैवषो
डशी त्रिपुरेश्वरी महांकुशस्वरूपा च महाचक्रेश्वरी तथा नव

चक्रेश्वरी चक्रेश्वरी त्रिपुरमालिनी राजराजेश्वरी भुक्तिमंहा
त्रिपुरसुंदरी सिंहासनारूढविराश्रीमत्रिपुरसुंदरी सर्वांगसुं
दरी रक्तारक्तवस्त्रानरायणी यवायावकसिंदूररक्तचंदनपा
रिणी चमरीचारुकुटिलानिर्मलश्यामकेशिनी वज्रमो
क्तिकरत्नाढ्याकिरीटमुकुटोज्वला रक्तकुंडलसंयुक्ता
स्फुरन्मुंडमनोरमा कुंजरीश्वरकुंभोत्थमुक्तारंजितनासि

स
८५

15

का मुक्ताविद्रुममाणिक्यहाराढ्यस्तनमंडला सूर्यकांते
न्दुकांताढ्यस्पर्शाश्मकंठभूषणा बीजपूरस्फुरद्बीजदंतपंक्ति
रनुत्तमा कामकोदंडकाभुग्नभ्रूकटाक्षप्रवर्षिणी मातंग
कुंभवक्षोजा लसत्कोकनदेक्षणा मनोज्ञशष्कुलीकर्णा हं
सीगतिविडंबिनी पद्मरागांगदद्योतद्दोश्चतुष्कप्रकाशिनी
नानामणिपरिस्फूर्जत्कुंडकांचनभूषणा नागेंद्रदंतनि

मौलावलयांचितपाणिनी श्रेणीचक्रचित्रांगीविचित्रत्न
रत्नवेदिका पट्टांबरपरीधाना कलमंजीररंजिता कश्मीरागुरु
कस्तूरीकुंकुमद्रवलेपिता विचित्ररत्नपृथिवीकल्पशाखि
तलस्थिता रत्नदीपास्फुरद्रत्नसिंहासननिवासिनी षट्
चक्रभेदनकरीपरमानंदरूपिणी सहस्रदलपद्मांतश्चंद्र
मंडलवर्तिनी ब्रह्मविष्णुशिवक्रीडानानामलविलासि

स॰
१६

16

नी हरविष्णुविरिंचेंद्रग्रहनायकसेविता आत्मयोनिर्ब्रह्म
योनिर्जगद्योनिरयोनिजा भगरूपा भगस्थात्रिभगिनी भग
वासिनी भगात्मिका भगाधाररूपिणी भगमालिनी लिंगा
भिधायिनी लिंगप्रिया लिंगनिवासिनी लिंगस्थालिंगिनी
लिंगरूपिणी लिंगसुंदरी लिंगस्थालिंगिनी लिंगप्रिया लिंग
सकोंतिणी शिवाशैवी च रुद्राणी शिवदा शिववासिनी मा

तंगीश्रामरीमानानतथैवानंगमेखला डाकिनीयोगिनीचैव
तथायोगिनमस्कृता माहेश्वरीवैष्णवीचश्रामरीशिवरूपि
णी श्रलंबुसाभोगवतीक्रोधयन्त्रणामेखला गांधारीगजजि
ह्वाचरअचैवशुभंकरी पिंगलाब्रह्मतीचसुभमालाचैववपिनी
लिंगस्थाचैवलिंगेशीत्रिभुवनभैरवीतथा लिंगस्थालिंगनीति
श्चलिंगशीतिमखश्चैवच लिंगमालालिंगभवालिंगलिंगाचभे

स॰

रवी भगवती कौशिकी च प्रेमा चैव प्रियंवदा गृध्ररूपा शिवरू-
पा च चक्रेशी चक्ररूपधृक् लिंगगीतिर्महाप्रीतिर्भगगीतिः स-
दारतिः लिंगनामसदानंता भगनामासदारतिः लिंगमालाकं-
ठभूषा भगमालाविभूषणा भगलिंगामृतप्रीता भगलिंगामृ-
तात्मिका भगलिंगार्चनप्रीता भगलिंगस्वरूपिणी भगलिंग-
स्वरूपा च भगलिंगसुखावहा स्वयंभूः कुसुमप्रीता स्वयंभूःकु

समार्चिता स्वयंभूः ऊरुसमप्राणा स्वयंभूः ऊरुसमोत्थिता स्व
यंभूः ऊरुसमम्लाना स्वयंभूः ऊरुसमार्चिता स्वयंभूः पुष्पवर्द्धिता
स्वयंभूः पुष्पधारिणी स्वयंभूः पुष्पतिलका स्वयंभूः पुष्पच
र्चिता स्वयंभूः पुष्पनिरता स्वयंभूः ऊरुसमग्रहा स्वयंभूः पु
ष्पयज्ञागा स्वयंभूः ऊरुसमात्मिका स्वयंभूः पुष्पनिलया
स्वयंभूः ऊरुसमप्रिया स्वयंभूः ऊरुसमाधारा लालसोन्मत्त

स· १८ 18

मानसा स्वयंभूः ऊष्मानंदलहरी स्निग्धदेहिनी स्वयंभूः ऊ
ष्माधारा स्वयंभूः ऊष्मालया स्वयंभूः पुष्पानिलया स्वयंभूः
पुष्पवासिनी स्वयंभूः ऊष्मास्निग्धा स्वयंभूः ऊष्मोत्का
स्वयंभूः पुष्पहारावस्वयंभूः पुष्पमालिका स्वयंभूः ऊष्
मान्यासा स्वयंभूः ऊष्मप्रभा स्वयंभूः ऊष्मज्ञाना स्वयंभूः
ऊष्मश्रेता स्वयंभूः ऊष्मध्याना स्वयंभूः पुष्पभोगिनी स्व

यंभूः उत्तमोत्तमा स्वयंभूः पुण्यवर्षिणी स्वयंभूः उत्त
मोज्ञादा स्वयंभूः पुण्यपुष्पिणी स्वयंभूः उत्तमोत्साह्ला स्व
यंभूः पुण्यहृषिणी स्वयंभूः उत्तमोन्मादा स्वयंभूः पुण्यके
दरी स्वयंभूः उत्तमाराध्या स्वयंभूः उत्तमोद्भवा स्वयंभूः
उत्तमव्यग्रा स्वयंभूः पुण्यपूजिता स्वयंभूः प्रजकश्वला
स्वयंभूः होतमातृका स्वयंभूः रुधिरकर्णी स्वयंभूः भक्तिभा

स॰
१९

विता स्वयंभूः सृजकर्त्री स्वयंभूः सृजकप्रिया स्वयंभूः वेद
काधारा स्वयंभूर्वेदकारका स्वयंभूः प्रदसर्वस्वा स्वयंभूः प्र
दप्रविणी स्वयंभूः प्रदसस्मेरा स्वयंभूः प्रदवैरिणी सर्वलो
कोद्भवश्रीना सर्वकालोद्भवोद्भवा ॐ दप्रच्छेः सदाश्रीनागो
लपुच्छसदागतिः ॐ उगोलोद्भवश्रीना ॐ उगोलोद्भवात्मि
का स्वयंभवाशिवाधात्रीपावनी लोकपावनी कीर्तिदे

19

शाखिनी मेधाविमेधा शुक्रसुंदरी महदामोददामोदामोदया
स्वप्रकाशिनी शुक्राधारा शुक्ररूपा शुक्रसिंधुनिवासिनी शु
क्रालया शुक्रभोगा शुक्रपूजासदारतिः शुक्रपूज्या शुक्रहोमासं
तुष्टा शुक्रवत्सला शुक्रमूर्तिः शुक्रकरी शुक्रपूजकपुत्रिका
शुक्रस्था शुक्रिणी शुक्रसंपूज्या शुक्रसुंदरी शुक्रस्नाता शुक्रदे
हा शुक्रतुष्टातिशुक्रिणी महाशुक्रा शुक्रभवा शुक्रवृष्टिविधा

स॰ २॰

यिनी शुक्राभिषेचा शुक्राहीं शुक्रकंदर्पविदारिका शुक्रानंदक
रीशुक्रासदानंदविधायिनी शुक्रोत्सवा सदा शुक्रासदानंदवि
धायिनी)[illegible](शुक्रमनोरमा शुक्रपूजकसर्वस्वा शुक्रनिंदक
नाशिनी शुक्रात्मिका शुक्रसंपत्कराकर्षणकारिणी श्प
वरा साधकप्राणा साधकासक्तमानसा साधकानंदसंतो
षा साधकारिविनाशिनी साधकोत्तमसर्वस्वा साधकांतक

20

रक्तपा आत्मविद्या ब्रह्मविद्या परंब्रह्मकुटुंबिनी विकटस्था
पंचवक्त्रा सर्वक्रूरशरीरिणी सर्ववर्णमयी वर्णजपमालावि
धायिनी १००० श्रीशिव उवाच इति श्रीकालिकानाम्नां स
हस्रं शक्तिभाषितं गुह्याद्गुह्यतरं साक्षान्महापातकनाशनं पू
जाकाले निशीथे च संध्ययोरुभयोरपि लभते गाणपत्यं सः
पठेत्साधकोत्तमः यः पठेत्पाठयेद्वापि शृणोति श्रावयेदपि

स· २१

सर्वपापविनिर्मुक्तः सयाति कालिकापदं श्रद्धयाश्रद्धयावापि
यः कश्चिन्मानवः पठेत् दुर्गोदुर्गतिनिर्मुक्तो देव्याः पाठश्च यो
वेत् वंध्या वा काकवंध्या वा मृतवत्सा च यो गना श्रुत्वा स्तोत्र
मिदं पुत्रान् लभते चिरजीविनः यं यं कामयते कामं पठन् स्तोत्रम
नुत्तमं देवीवरप्रसादेन तं तं प्राप्नोति निश्चयः स्वयंभूः ऊर्ध्व
मेः शुक्रैः सर्गादिऊर्ध्वसमान्वितैः पञ्चाशद्वर्णकलितं हरार्कचंद्र

नसंयुतैः मत्स्यमांसादिभिर्वीरमधुभिः साज्यपायसैः भक्ता
पिनीतैर्मंत्रेणासादितैः शक्तिभिः सह पंचोपचारैर्नैवेद्यैर्ब
लिभिर्वह्नशोणितैः दीपैर्धूपैर्महादेवीं प्रजपित्वा मनोरमैः
जप्त्वा महामंत्रं स्तोत्रं पठेद्भक्तिसमन्वितः अनन्यचेताः स्थि
रधीर्मुक्तकेशो दिगंबरः शवारूढः स्थितास्यो वा श्मशाना
लयमागतः शून्यालयगतो वापि शय्यास्थो वा शिवान्वि

स०
२२
22

कः संभवेत्कालिकाप्रत्यक्षनित्योनिपुणागतः सर्वविद्यावतां
श्रेष्ठोधनेनचधनाधिपः वायुतत्वबलोलोकेदुर्जयः शत्रुमर्द
नः सर्वसंकटसंहारीणः सर्वसिद्धिसमन्वितः मधुमत्यासदैवदे
व्यासेव्यमानःस्थिरोपमः महेशाराधयोगीन्द्रः सर्वसत्वशुभस्कृ
तः कामिनीकामरूपोसौसर्वनारीप्रकर्षकः जलस्यैदु
वायनांस्तंभकोराजवल्लभः यशस्वीसत्कविर्धीमान्मंत्रीको

किलस्तवनः बहुपुत्रोगजाख्यानामीश्वरोधार्मिकः कृती मा
र्कंडेयपुत्रवायुष्मान्जरापलितवर्जितः नवयौवनयुक्तः स्या
द्यपिवर्षसहस्रकं बहुकिंकथ्यतेतस्यपठतः स्तवमुत्तमं
नकिंचिद्दुर्लभंलोकेयद्यन्मनसिकल्पितं ब्रह्महत्यासुरापा
नंस्तेयंगुर्वंगनागमः सर्वमाशुतरत्येवस्तवस्यास्यप्रसाद
तः रजस्वलाभगंपश्यन्जप्त्वाकालीमहामनुं स्तवेनाने

स॰ २२

22

नसंस्तस्यसाधकः किंनसाधयेत् परदारपरोवापिमंत्रंजपा
पठेस्तवं कुबेरश्चविज्ञाढ्योजायतेमदनोपमः श्रुत्वेतरश
नंजह्यायोनिमामंत्रमंत्रवित् संगमस्यपठनादस्यसर्वविद्ये
श्वरोभवेत् दिगंबरोमुक्तकेशः शय्यास्थोमिथुनेरतः ज
प्त्वास्तत्वामहाकालींखेचरोजायतेचिरात् यदियोषित
संसर्गस्तत्रोरतः प्रयत्नतः समुच्चार्यततोजाप्यंतेनस्तुः

सर्वसिद्धयः शुक्रोद्धारणकाले च जपपूजापरायणः श्म
शानकालिकां स्तुत्वा वाणीवत्सकविर्भवेत् आलोकयं
स्त्रिं नग्नां विवस्त्रां परयोषितां जप्त्वा स्तुत्वा महाकालीं देव
रो जायते चिरात् स्मरतेष मन्त्रं जप्त्वा स्तुत्वा भगवतीं शिवां स
र्वपापपरित्यक्तो मानवः स्यात् कुबेरोपमः ॐ ह्रूं स्त्रीं ऐं ह्सैं क्रों
ति चतुर्दश्यष्टम्यां च नवम्यां मंगलदिने पठेत् स्तोत्रं समा

पकः भौमावस्यां निशीथे च चतुष्पथगतो नरः मांसभक्त
बलिं दत्वा सङुगपमीनशोणितं अष्टोत्तरशतं जप्त्वा पठेन्नाम
सहस्रकं सदर्शनो भवेदाशु देवगंधर्वसेवितः येनकेनप्रका
रेण कालीभक्तिपरायणः स्तंभयेदखिलांल्लोकान्राजानमपि
मोहयेत् आकर्षयेद्देवकन्यावशयेदपिकेशवं मारयेदखि
लान्देहशत्रून्नाशयति शाश्वतान् नरमार्जारमहिषच्छागमूषक

शोणितैः सास्थिमांसैः समधुभिः सामृतैर्उग्रपायसैः यो
निक्षालितनोयेनभगलिंगामृतेनच छुंडैः स्वजाजपांतेचका
लीमंतर्व्यंसाधकः सहस्रनाममंत्रैर्दिव्यैः स्तौतिभक्तिपरायणः
मातेवकालिकातस्यसर्वेश्वहितकारणी परनिंदापरद्रोहप
रस्वादपरायच खलायपरतेजायप्रष्टायासाधकायच शिवा
भक्तायदुष्टायदूषकायदुरात्मने हरिभक्तिविहीनायपरदार

स.
२१
25

रतायच प्रज्ञानपविहीनायपरस्त्रीनिरकायच नस्तवेदशीं
येदित्वंसंदर्शयेशिवद्रोभवेत् कुलेनायमहेच्छायउगोभक्तिय
रायच वैष्णावायविशुद्धायभवभक्तायमेत्रिणे शुद्धेनानंदरू
पायनिवेदितरतायच ब्रह्मविष्णुमहेशानामभेदेनमहेश्वरी
समंशंभावयेन्नंशीमहेशानात्रसंशयः सशाक्तःशिवभक्तिश्च
सएववैष्णवोत्तमः सप्रज्ञप्लोनियःकालीमद्वैतभावमावह

न् दिव्यानंदेन सानंदो देवीभक्त्यैव भक्तिमान् सएवधर्म्मोयस्या

ध्यैयमहेशोव्यग्रमानसः कामयित्वा यथाकामं स्तवयेन शरीरये

न् सर्वरोगपरिमुक्तो जायते मदनोपमः चक्रं वा स्तवमेनं वा

धारयेदंगसंगतं विलिख्य विधिवत्साधुः सएव कालिकातनुः

देव्यै निवेदितं यच्च तत्सर्वं भक्तयेन्नरः दिव्यदेहधरो भूत्वा देव्याः

पार्श्वचरो भवेत् नैवेद्यनिंदकं दृष्ट्वा नृत्यंति योगिनीगणाः २

स॰ २९ 26

न्तेणापनोदिताः सर्वैमां सा प्रियश्च वर्णो यताः तस्मात्त्रिवेहिते देवो दृष्टोहत्वा तमानवः नन्दितेन मनसा वाचा सर्वे व्याधि पराङ्मुखः आत्मानं कालिकात्मानं भावयन्त्सौ निर्निमेषशः शिवाय मं गुरुं ध्यात्वा सप्त वा त्रि सहाशिवः यस्मालये तिष्ठति नूनमेतन्त्लो के भवात्मालिखिते निधिनैः गोरोचनालक्तककुङ्कुमाऊकं सं सिद्धमध्वरवेण नतत्र चौरस्य भयं नरस्य नो मनोरथो नाशनिव

द्धिभीतिः उत्पातवायोरपिनात्रशंकालक्ष्मीः स्वयंनत्रवसे

दलोला स्तोत्रंपठेदेनदनंतरूपंकालीपदांभोजपरोमनु

ष्यः विधानपूजाफलमेवसम्यक्प्राप्नोतिसंपूर्णमनोरथो

सौ मुक्ताःश्रीचरणारविंदविमुत्वोः स्वर्गामिनोभोगिनो

ब्रह्मलोपेंद्रशिवात्मकाचेनमुत्वेलोकेपिसंलेभिरे श्रीमकं

करभक्तिपूर्वकमहाकालीपदध्यायिनो मुक्तिर्मूर्तिमती

स
८७

27

स्वयंस्तुतिपराभुक्तिः करस्थायिनी इतिश्रीकालीसर्वे
स्वेशिवपरशुरामसंवादेमहाकालीसर्वस्वेश्रीमहाका
लीसहस्रनामसमाप्तं ॥

ॐ श्रीगणेशाय नमः ॐ कैलासशिखरे रम्ये नानापुष्पो
पशोभिते कल्पपादपमध्यस्थे नानारत्नोपशोभिते १ म
णिमंडपमध्यस्थे मुनिगंधर्वसेविते नेकदाचित्सुखासी
नेभगवंतेजगद्गुरुं २ कपालखट्वांगधरं चंद्रार्द्धकृतशेखरं
त्रिशूलडमरूहस्तंमहावृषभवाहनं ३ जटाजूटधरंदेवंकं
ठवासुकिभूषणं विभूतिभूषणंदेवंनीलकंठंत्रिलोचनं

पा॰
स॰
२

४ द्वीपचर्मपरीधानं शुद्धस्फटिकसन्निभं सहस्रादित्यसंका
शं गिरिजार्द्धांगभूषणं ५ प्रणम्य शिरसा नाथं कारणं विश्व
रूपिणं कृतांजलिपुटो भूत्वा पार्थ्यतच्छिखिवाहन ६ का
के उवाच देवदेव महादेव सृष्टिस्थित्यंतकारक त्वं गतिः
सर्वदेवानां त्वं गतिः सर्वदेहिनां ७ त्वं गतिः सर्वलोका
नां दीनानां च त्वमेव हि त्वमेव जगदाधारस्त्वमेव विश्वका

गुणं च त्वमेवप्रभुः सर्वेषांत्वदृते नास्तिमेगतिः किंस्वि

त्परमंलोके किंवाप्येकंपरायणं २ किमेकंपरमंश्रे

ष्ठंकिंयोगःसर्वमोत्तरः विनातीर्थेनतपसाविनादाने

र्विनामखैः ३ विनात्वयेनध्यानेनकेनसिद्धिमवाप्नुया

त् कस्मात्कस्याघनेसृष्टिः कस्मिंश्चप्रलयोभवेत् ॥ कस्मा

त्नीघनेदेवसंसारार्णवसंकटात् नरस्त्रोतामिच्छामि

श्या
सं.
२

२

कथयस्व महेश्वर ॥ २ ॥ महादेव उवाच साधु साधु त्वया पृष्ट
मम पार्वतिनंदन श्रलिंगरूपं तमे गुह्यं कथयिष्यामि सांप्रतं
